२-—"परिवार सामाजिक जीवन को स्थायी पाठशाला हो ।" समीक्षा गर्नुहोस् ।

३—राज्य भन्नाले तपाईं के संझनुहुन्छ र राज्य तथा सरकारमा के अन्तर छ, उल्लेख गर्नुहोस् ।

४—राज्यको उत्पत्ति संबन्धी सामाजिक समझौता-सिद्धान्तको समीक्षा गर्नुहोस् ।

५—आष्टिनको संप्रभुता संवन्धो धारणाको समीक्षा गर्नुहोस् ।

६--आदर्श नागरिकताको मार्गमा कुन-कुन वाधाहरू छन् ? र ती कसरि हटाउन सकिन्छ ?

७—'स्वतंत्रता' भनेको के हो ? स्वतंत्रता कानूनमा के सम्बन्ध छ ?

८—संघीय शासन प्रणाली भन्नाले तपाईं के संझनुहुन्छ र यसका के के दोष छन्, उल्लेख गर्नुहोस् ।

खण्ड "ख"

९—राजा कस्तो हुनुपर्छ ? नीतिवाक्यामृतको आधारमा उत्तर दिनुहोस् ।

१०–सेना का चार अंग कुन कुन हुन् ? स्पष्ट उल्लेख गर्नुहोस ।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्थशास्त्र भएको

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] सवै प्रश्नहरूका अंक समान छन् ।

[ख] कुनै छ वटा प्रश्नहरूको मात्र उत्तर लेख्नुहोस् ।

१—अर्थशास्त्रको परिभाषा दिनुहोस् ।

२—मागको लचकता के हो र यो कसरी नापिन्छ । यसको कुनै व्यवहारिक उपयोगिता भए सो पनि लेख्नोस् ।

३—श्रमको कार्य कुशलता के केमा निर्भर गर्दछ सवै खुलाएर लेख्नु होस्

४—पूँजी के हो ? यसको उत्पादनमा के स्थान छ ? हिजो आज पूँजीको महत्व किन वढ़िरहेको हो ?

५—माग के हो ? किन मालको मोलमा घटवढ़ भए पछि 'माग' को परिमाणमा विपरीत असर पर्दछ ? कहिले यस्तो विरीत असर न पर्नशक्छ ?

५—केलाई 'प्रवन्धक' भनिन्छ ? उत्पादनमा यसको कस्तो महत्व रहन्छ ?

७—सरकारी आम्दानीका मुख्य सिद्धान्तहरूको वर्णन गर्नोस् ।

८—नेपालको ग्रामीण ऋण समस्या वारे थाहा पाएको जति छोट्करीमा लेख्नोस् ।

९—नेपालको मुख्य प्राकृतिक साधनहरू के के हुन् ? के यो देश प्राकृतिक साधनको अभाव ले गर्दा नै गरिव भएको हो ?

१०—कुनै दुइ वटामा टिप्पणी लेख्नोस् ।

(क) उपयोगिता (ख) आवश्यकता ।

(ग) घटदो प्रतिफल नियम (Law of Diminishing Returns)

(घ) नेपालमा विद्युत् शक्ति ।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्ष २०२३ (१९६७)

Time—3 hours] [*Full Marks—100*

Group A

1. Attempt *any two* of the following : 30

(a) Which one of Shakespeare's heroines do you admire most in 'Stories from Shakespeare'? State your reasons and give a sketch of her character.

(b) Describe *any two* important contributions made by Pasteur to humanity.

(c) "*A Tale of Two Cities* gives a vivid picture of Paris during French Revolution". Discuss.

(d) Write a few lines about your impressions of Tenzing.

(e) Describe The Battle of the Windmills.

(f) Give reasons why Ashok is considered a great King in the history of the world.

Group B

2. Attempt *any two* of the following :— 30

(a) 'Was the Lord Buddha on the top ?' I have been asked. Or, 'Did you see the Lord Siva ?' I can tell only the truth; and this is : no, on the top of Everest I did not see anything supernatural or feel anything superhuman. What I felt was a great closeness to God, and that was enough for me. In my deepest heart I thanked God. And as we turned to leave the summit I prayed to Him for something very real and very practical : that, having given us victory, He would get us down off the mountain alive.

I. Why did people ask Tenzing whether he saw Buddha or Siva on the top of Everest ?

II. 'I can tell only the truth,' says Tenzing. What is that truth ?

P. T. O.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

III. What was the real and practical thing that Tenzing prayed for as he turned to leave the summit ?

(b) M. Pasteur has introduced many new ideas, and his creative imagination, controlled by the most exact observation of facts, has been the means of destroying many false beliefs.

I. Mention some new ideas introduced by Pasteur.

II. What were the false belief destroyed by Pasteur ?

(c) "When I look for ahimsa, Truth says, 'Find it out through me.' When I look for Truth, ahimsa says, 'Find it out through me.' " Mahatma Gandhi stressed that unbreakable bond between Truth and ahimsa.

I. What are Gandhi's views about *ahimsa* ?

II. How are Truth and *ahimsa* related to each other ?

Group C

3. Analyse the following sentence clausewise :— 1(

They hated the black mourning clothes which Hamlet refused to leave off wearing, because when they say them they were reminded of the old King's death, which they wanted to forget.

4. Change the form of narration .— 1

(a) 'All I ask,' he said 'is the payment of what is due to me by law. And that was written in the bond.' 'But,' asked Portia, 'can he not pay back the sum you lent him ?'

(b) A young man once said to his doctor, "How is it that I am so often ill ? I take great care of myself; I never go out in the rain; I wear warm clothes; I eat good food. Yet I am always catching cold, or getting fever."

5.

6.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

5. Correct the following sentences :— **10**

(a) The Prime Minister, with other cabinet members, are to attend the funeral.

(b) One must not boast of his wealth.

(c) We have not heard of him being here.

(d) This data is quite incorrect.

(e) I prefer to walk than to ride.

6. Fill up the blanks in the following : – **10**

(a) The application—this discovery—industry will lead—economic prosperity.

(b) The book is full—references—places that I know well.

(c) The quarrel originated—rivalry—two tribes.

(d) I am your friend, but—my capacity as an officer—the law I must take you—custody.

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समय:

१—

२—अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उ॰ म॰ प्र॰ ख॰ अ॰ साहित्य
ट (१७)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—१००

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—अधोनिर्दिष्टेषु श्लोकेषु यथेच्छं त्रयाणामेव श्लोकानां व्याकरणकोशालङ्कारप्रसङ्गादिप्रदर्शन-पुरःसरं व्याख्या विधेया । ३०

(क) आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥

(ख) नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति ।
आशंसन्ते समितिषु सुराः सक्तवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं, पौरुहूते च वज्रे ॥

(ग) तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियम् ।
क्लान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः ॥
हस्ताद् भ्रष्टमिदं बिसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहादीशोऽस्मि शून्यादपि ॥

(घ) अन्तर्हिते शशिनि सैव कुमुद्वतीयम्,
दृष्टिं न नन्दयति संस्मरणीयशोभा ॥
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रदुरुद्वहानि ॥

(ङ) स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते सृष्टिरेवंविधैव ॥
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णम्,
शमयति परितापं छायया संश्रितानाम् ॥

२—अधस्तनयोः श्लोकयोरन्यतरस्य श्लोकस्य संस्कृते सरलार्थो विधेयः । १०

(क) कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी,
पादास्तामभितो निषण्णचमरा गौरीगुरोः पावनाः
शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः-
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥

अपर पृष्ठं द्रष्टव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी,
पर्णाभ्यन्तरलीनतां विजहति स्कन्धोदयात् पादपाः ।।
सन्तानं तनुभागनष्टसलिलव्यक्त्या व्रजन्त्यापगाः,
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते ।।

३—अधोलिखितयोः प्राकृतगद्यपद्ययोरन्यतरस्यांशस्य संस्कृते सप्रसङ्गं व्याख्या कार्या । १०

(क) उग्गिण्णदब्भकवला मई, परिच्चत्तणत्तणा मोरी ।
ओसरिअपाण्डुपत्ता मुअन्ति अस्सुं विअ लदाओ ।।

(ख) सुणादु महाभाओ । एसा अवराजिदा णाम सुरमहोसही । इमस्स दार अस्स जादकम्मसमए भअवदा मारीएण दिण्णा । एदं किल मादापिदरो, अप्पाणं च वज्जिअ अवरो भूमिपदिअं न गेह्लादि ।

अथवा

तृतीयस्य वा चतुर्थस्याङ्कस्य कथाभागः सरलया सुरभारत्या वर्णनीयः ।

४—'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला' इत्युक्तिः संस्कृते समर्थनीया ।

५—(क) 'न रत्नमन्विष्यति मृग्यते हि तत्'
(ख) 'हंसो हि क्षीरमादत्ते, तन्मिश्रा वर्जयत्यपः' ।
(ग) 'सरस्वती श्रुतिमहती महीयताम्' ।
स्वेच्छया कयोरपि द्वयोः श्लोकांशयोः संस्कृते भावार्थौ लेखनीयौ ।

६—पञ्चचामरे दीपकम्, मन्दाक्रान्तायामुत्प्रेक्षा,
स्रग्धरायां तुल्ययोगिता, वसन्ततिलकायां परिणामः,
प्रहर्षिण्यामुल्लेखः । शिखरिण्यामपह्नुतिः,
प्रमिताक्षरायां रूपकम्, :—एतेषु यथेच्छं चतुर्णाम् वृत्तालङ्काराणां लक्षणानि विलिख्य तान्युदाहरणेषु सङ्गमनीयानि ।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उ. म. प्रथमवर्ष
कारिकावली

ट (१८)

वर्ष: २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः — १००

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

सूचना--यथेच्छं पञ्चसमाधेयाः सर्वे समानाङ्काः ।

१--समाहितविघ्नध्वंसयोः कार्यकारणभाव आक्षिप्य समाधेयः ।

२—अभावस्याधिकरणात्मककत्वंनिरस्यताम् ।

३—सुवर्णस्य तैजसत्वं कथम् ?

४—वायोः प्रत्यक्षं भवति नवा चेत् कथम् ?

५—ईश्वरस्य कतिगुणाः ? के च ते ?

६—इन्द्रियलक्षणं सपदकृत्यं विलिख्यताम् ।

न्यायमुक्तावली

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—१००

परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—अघसत्, विदाञ्चकार, माष्टी, ननाश, आनर्घ, कृषीष्ट, अम्राक्षीत्, अभुनक्, अचूचुरत्, एषु पञ्च प्रयोगाः साधनीयाः । २०

२—अशूशवत्, अविजिगांसते, अवोभूयिष्ट, दिव्यति, संक्रीडति चक्रम्, उपरमति, थभावि, त्वं कन्यां वहेः, कलिङ्गेष्ववात्सीः, एतेषु पञ्चानां साधनं विधेयम् । २०

३—ब्रह्मभूयम्, मन्त्री, रजकः, शब्दकारः, आढयम्भविष्णुः, सुकृत्, शुष्कः, जरन्, स्तोत्रम्, चन्द्रमाः, हसनम्, अवतारः, कथंकारम्, एतेषु विग्रहार्थदर्शनपूर्वकं सप्तप्रयोगाः साधनीयाः । २०

४—गर्गाः, वाङ्गः, शूल्यम्, सौमेन्द्रः, यौवनम्, यौष्माकः, स्रौघ्नः पन्थाः, हालिकम्, हरीतक्यः, पाक्षिकः, गोता, विंशम्, इह, द्विभुंङ्क्ते, एतेषु सप्तप्रयोगा अर्थप्रदर्शनपूर्वकं साधनीयाः । २०

५—द्विपात्, यका, पञ्चाश्वा, मनुः, श्वश्रूः, प्रणर्ग्रायूंषितारिषत्, जठरं प्रणध्यै, गोपायतं नः, एतेषु पञ्चानां सिद्धिर्विधेया । २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षः २०२३ (१९६७)

समय : —घण्टात्रयम्] [पूर्णाङ्काः ५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः । देवानामसि वन्हितमर्ठ-सस्नितमं पप्रितमं जुष्टतमं देवहूतमम् ॥

मा भे र्मा संविक्था अतमेरुर्यज्ञोतमेरुर्यजमानस्य प्रजा भूयात् त्रिताय त्वा द्विताय त्वैकताय त्वा ॥ वीति होत्रं त्वा कवे द्युमन्तर्ठ समिधीमहि । अग्ने बृहन्तमध्वरे ॥

मनो जूतिर्जुषतामाज्यस्य वृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञर्ठ समिमं दधातु । विश्वे देवास इह मा दयन्तामों३ प्रतिष्ठ । उप त्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत । जयस्व समिधो मम ॥

एषु यथेच्छं त्रयो मन्त्रा महीधरदिशा व्याख्येयाः । २०

२—त्रिर्ठ शद्धाम विराजति वाक् पतङ्गाय धीतते प्रति वस्तोरह द्युभिः ॥

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥ ध्रुवोऽसि पृथिवीं दृर्ठह ध्रुवक्षिदस्य-न्तरिक्षं दृर्ठहाच्युतक्षिदसि दिवं दृठं हाग्नेः पुरीषमसि ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥

एषु यथारुचि त्रयो मन्त्राः महीधर दिशा सम्यग् व्याख्येयाः । १५

३—वाचस्पतये पवस्व वृष्णो अर्ठशुभ्यां गभस्तिपूतः । देवो देवेभ्यः पवस्व येषां भागोऽसि ॥ देवा गातुविदो गातुं वित्वा गतुमित । मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः ॥

सोमयागः कतिभिरध्यायैः प्रतिपादितः । तत्र प्राधान्येन कियन्ति कर्माणि भवन्ति विलिखत । १५

अथवा

पिण्ड-पितृ-यज्ञे किमपि मन्त्रत्रयं महीधरदिशा व्याख्येयम् ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा: प्र: धर्म.

श (२)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्]   [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—अधो निर्दिष्टेषु सूत्रेषु कान्यपि पञ्चसूत्राणि सप्रसङ्गं हरिहरानुसारेण व्याख्येयानि— १५

(क) आवसथ्याधानं दारकाले । (ख) यक्ष्यमाणास्त्वृत्विजः । (ग) प्रदक्षिणमग्निं पर्याणीयैके । (घ) प्रोष्येत्य गृहानुपतिष्ठते पूर्ववत् । (ङ) तृतीये वाऽप्रतिहते । (च) सर्वेषां वा गायत्रीम् । (छ) कालातिक्रमे नियतवत् । (ज) दृढव्रतो वधत्रःस्यात् सर्वेषां मित्रमिव । (ज) न पूर्वचोदितत्वात्सन्देहः ।

२—अग्न्याधेयदेवता नामतो निर्दिश्याऽऽयुष्यकरणमेधाजननकर्मणोः स्वरूपं विलिखत । १०

३—आज्योद्वासनप्रकारः कः ? के च पाकयज्ञाः ? "अक्षतधानाः" अस्य पदस्य कोऽर्थः ? ५

४—कुमार्या उत्तरीयपरिधानीयधारणस्य मन्त्रौ विलिख्य ब्राह्मणस्य ब्रह्मचारिणो मेखलादण्डयोर्लक्षणं ब्रूत । १०

अथवा

मधुपर्कप्राशनमन्त्रं विलिख्य "भुक्त्वार्द्रपाणिरुदके निशायाᳫँ सन्धिवेलयोरन्तः शवे ग्रामेऽन्तर्दिवाकीर्त्यें" सूत्रमिदं सप्रसंगं व्याख्यायताम् ।

५—लाङ्गलयोजनोपाकर्म कर्मणोरन्यतरस्य स्वरूपं हरिहरानुसारं लिखत । १०

अथवा

प्रथमकाण्डस्याद्यकण्डिकायां ये विषयाः सन्ति ते संक्षिप्य लेख्याः ।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
वैदिकव्याकरण

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

(क) परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

(ख) समानाङ्काः समे प्रश्नाः केचित् पञ्चैव समाधेयाः ।

१—नभस्रत् । या खर्वेण पिबति तस्मै खर्वः । पावयाङ्क्रियात् । सुतेभिः सुप्रयसा मादयैते । सभेयो युवा । आश्विनीरुपदधाति । उभयतो तदः प्रति गृह्णाति । आमागन्तां पितरा मातरा च ।

एषु यथेच्छं पञ्च रूपाणि ससूत्रनिर्देशं साध्यानि ।

२—सग्धिश्च मे । दिवं सुपर्णो गत्वाय । उत्तानाया हृदयं यद् विकस्तम् । भुव इति । गां मे देहि भोः । सूर्यो नो दिवस्पातु । पृतनासहम् । त्रिभिष्ट्वं देव सवितः ।

उपरि लिखितेषु षट्सु सूत्रनिर्देशपूर्वकं विशेषकार्याणि लेख्यानि ।

३—गुपेश्छन्दसि । लेटोऽडाटौ । मत्वर्थे मासतन्वोः । अनुदात्ते च कुधपरे । तस्य तात् । प्लुता वैव इदुतौ । सनोतेरनः ।

एषु यथेच्छं चत्वारि सूत्राणि सोदाहरणं व्याख्येयानि ।

४—देवीं वाचम् । आगच्छ भो माणवक । योऽग्निहोत्रं जुहोति । वेत्रवती । उच्चैः । अग्निः । अष्टाभिर्दशभिः । चेत्तन्ती सुमतीनाम् ।

एषु पञ्चानां स्वरविधायकसूत्राणि लेख्यानि ।

५—कृष्णसारङ्गः । आढ्यपूर्वः । श्रेणिकृता । तन्तिपालः । शुक्लकरणः विष्णुश्रुतः । पचति गोत्रं । आगच्छ देवग्रामं प्रविश । इन्द्रवाजेसु नोऽव । पचन्ति पूति ।

एषु षट्सु स्वरविधायकसूत्राणि प्रदर्शनीयानि ।

६—अधोलिखितेषु त्रयाणां सूत्राणां व्याख्या सोदाहरणं विधेया । वर्षा वर्षोऽष्वने ते । थाथ क्ताज वित्रकाणाम् । हि च । एहि मन्ये प्रहासे लृट् । गतिर्गतौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समय

१—

२—

३ -

४—

५—

६—

७—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा० प्र० रत्न० मनोरमा

श (४)

वर्षः२०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

[ख] केऽपि यथारुचि पञ्चैव प्रश्नाः समाधेयाः ।

१—"हलन्त्यमि"त्यत्र हल्पदमेत्रावर्त्त्यैकत्र हस्य लिति विग्रहेण हसमीपो लकार इदिति, उपदेशेऽन्त्यं हलदिति च वाक्यार्थद्वयमिति कैयटमते सामीप्यस्य षष्ठ्यर्थत्वाभावं रत्नकारक्रोडीकृतोदाहरणमुखेन सप्रसङ्गं साधयन्तु । १०

२—पूर्वत्रासिद्धमित्यस्य स्वतन्त्रविधित्वे प्रसक्तदोषान् परिगणय्य, प्रदर्श्य च सिद्धान्तपक्षं, नाऽऽज्झलावित्यस्यानावश्यकतां युक्त्या प्रतिपादयन्तु । १०

३ - इकोयणचीत्यादौ दीर्घकारादीनां ग्रहणायमनोरमा शब्दरत्नयोः प्रदर्शित-मुपायं पृथङ्निरूप्य तयोर्युक्ताऽयुक्तत्वे विवेचयन्तु । १०

४—एत्येधत्यूठ्सु"–इति सूत्रेऽनुवर्तमानस्यैचीत्यंशस्य कस्य विशेषणत्वमिति विचारे प्राप्तप्राचीन माधवमतोपमर्द्दन पुरस्सरं सिद्धान्तपक्षं व्यवस्थापयन्तु । १०

५—"ङः सिधुट्" इत्यत्र धुटः प्रश्नान्तत्वात् "शिलुक्" इत्यनेनापि धुट एव विधानं युक्तमिति शङ्कां निराकुर्वन्तु । १०

६—इदुदुपधस्य चाऽप्रत्ययस्येति सूत्रे व्याख्यादर्शोक्तरीत्या अप्रत्यय इत्यस्य विसर्गेण सह सामानाधिकरण्येनान्वये कविभिः कृतमित्यादौ समापतिता-मापत्तिं वारयन्तु । १०

७—विभाषा भवद्भगवद् मघवतामिति वार्तिकस्यावश्यकतां मण्डयन्तु खण्ड-यन्तु वा । १०

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा० प्र० ख० कौमुदी

श (५)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्कः—५०

परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—मनुष्वदग्ने, पुत्र ईधे अथर्वणः, आध्वं नो देवाः, अग्नन्नुषासः, उपचाय्यपृडम्, चक्राणा वृष्णिम्, प्रण आयूंषि तारिषत्, ततुरिः, एषु चतुर्णाम् प्रयोगाणां सूत्रनिर्देशपूर्वकं साधुत्वं प्रदर्श्य, "इन्धिभवतिभ्यां च" इति सूत्रप्रत्याख्यानप्रकारः स्फुटीक्रियताम् । १०

२—विभ्वी, अग्रियः, पञ्चथम्, दोहीयसी धेनुः, यस्तित्याज, सगर्भ्यः, प्रथमं दध्र आपः, ववीं वृत्रम्, एतेषां मध्ये पञ्चसु वैदिककार्यविशेषाः निर्दिश्यन्ताम् । १०

३—हरिवो मेदिनं त्वा, महाँ इन्द्रः, अभीषुणः, एतेषां सिद्धिं प्रतिपाद्य, अग्ना३याशा, इत्यादौ "इकोयणचि" इत्यनेन यणादेशसिद्धौ "तयोर्य्वावचि संहितायाम्" इति सूत्रस्य प्रयोजनमस्ति नवेति निर्णीयताम् । १०

४—गोपायतं नः, सुब्रह्मण्यो३म्, दधाना इन्द्रे, चश्वा, उपत्वाग्नेदिवेदिवे, लुलविथ, गोलवणम्; एतेषां पञ्चसु सप्रमाणं स्वरविशेषाः प्रतिपाद्यन्ताम् । १०

५—प्राच्यसप्तसमः, उष्ट्रक्रोशी, प्रभेदः, पचति गोत्रम्, काष्ठाध्यापकः, एषु ससूत्रं स्वरविशेषाः प्रदर्श्यन्ताम् । १०

अथवा

"गतिकारकोपपदात् कृत्" इति सूत्रे कृद्ग्रहणस्य कर्त्तव्याकर्त्तव्यत्वविषये ग्रन्थकारसिद्धान्तं प्रतिपाद्य, अग्निमीले पुरोहितमित्यादौ स्वरसञ्चारप्रकारो विशदं निरूप्यताम् ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्री प्रथम वर्ष
महा भाष्य

श (६)

वर्षः २०२३ (१९६७)

समय :—घण्टात्रयम्] [पूर्णाङ्काः ५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।
[ख] समानांकेषु प्रश्नेषु केऽपि पञ्च समाधेयाः परमन्तिमो न हेयः ।

१—"अथ गौरित्यत्र कः शब्दः" इति प्रश्ने पक्षान्तरनिराकरणपूर्वकं भाष्योक्तं शब्दस्वरूपं स्पष्टमभिदधतु ।

२—"किम्पुनः शब्दस्य ज्ञाने धर्मः, आहोस्वित्प्रयोगे" इति भाष्योक्तं पक्षद्वयं सम्यगुत्थाप्य सिद्धान्तपक्षं स्वच्छमुपस्थापयन्तु ।

३—"अनुबन्धसंकरस्तु" "एकाजनेकाज्ग्रहणेषु चानुपपत्तिः" "द्रव्यवच्चोपचाराः" इति वार्त्तिकत्रयस्याशयं सप्रसङ्गाभिधानं वदन्तु ।

४—लृकारोपदेशस्य, हकारद्वयोपदेशस्य वा प्रयोजनं भाष्यसरण्या लिखन्तु ।

५—वर्णैकदेशानां वर्णग्रहणेन ग्रहणं भवति न वेति संक्षेपतो विविच्य सिद्धान्तपक्षं भाष्योक्तदिशा निर्दिशन्तु ।

६—"सतो वृद्ध्यादिषु संज्ञाभावात्तदाश्रय इतरेतराश्रयत्वादप्रसिद्धिः" इत्यादिनोक्तमन्योन्याश्रयदोषं स्पष्टमुद्भाव्य निराकृत्य च, वृद्धिगुणसंज्ञयोः प्रत्येकं वचनमिति शङ्कायाः समाधानं कुर्वन्तु ।

७—"इकोगुणवृद्धि" इति सूत्रे तच्छेषतदपवादपक्षौ सम्यक् प्रदर्श्य सिद्धान्तपक्षमत्रत्यं यथाभाष्यं वर्णयन्तु ।

८—'गतिरष्टविधोष्मणः' इत्यत्रोक्ताष्टप्रकारान् प्रदर्श्य, अत्रोष्मपदेन सकारस्य, विसर्गस्य, शषसहानां वा ग्रहणमिति सप्रमाणं वदन्तु ।

अथवा

नवपदशय्याः पाठकदोषांश्च प्रदर्श्य, रङ्गदुःस्पष्टपदाभ्यां किं विवक्षितमिति सयुक्तिकं कथयन्तु ।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समय

१—

२—

३—

४—

रेपु के

५—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आ·पु·सा·वि·

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—यथेच्छं पद्यत्रयस्यैव विशदा व्याख्या विधेया । १५

(क) रम्या इति प्राप्तवतीः पताका रागं विविक्ता इति वर्धयन्तीः ।
यस्यामसेवन्त नमद्वलीकाः समं वधूभिर्वलभीर्युवानः ॥

(ख) अयमतिजरठाः प्रकामगुर्वीरलघुविलम्बिपयोधरोपरुद्धाः ।
सततमसुमतामगम्यरूपाः परिणतदिक्करिकास्तटीर्बिभर्ति ॥

(ग) आवर्तिनः शुभफलप्रदशुक्तियुक्ताः
संपन्नदेवमणयो भृतरन्ध्रभागाः ।
अश्वाः प्यधुर्वसुमतीमतिरोचमाना-
स्तूर्णं पयोधय इवोर्मिभिरापतन्तः ॥

(घ) मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥

(ङ) अभीष्टमासाद्य चिराय काले समुद्धृताशं कमनी चकाशे ।
योषिन्मनोजन्मसुखोदयेषु समुद्धृताशङ्कमनीचकाशे ॥

२—'माघे सन्ति त्रयो गुणाः'—सूक्तिरेषा सयुक्तिकं समर्थनीया । ५

३—तदेतत् काकतालीयमवितर्कितसम्भवम् ।
दृष्टं चेद् वदनं तस्याः किं पद्मेन किमिन्दुना ।
अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते ।
नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखम् ।
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
एतेषु पद्यांशेष्वलङ्काराणां सङ्गमनं कार्यम् । १०

४—रूपकातिशयोक्ति-व्यतिरेक-विनोक्ति-प्रस्तुतांकुर-व्याघात-समुच्चय-विकस्वरेषु केषाञ्चित्पञ्चानामेवालङ्काराणां लक्ष्यलक्षणानि लेखनीयानि । १०

५—प्रमाणालङ्काराः प्रदर्शनीयाः । १०

अथवा

संक्षेपेण संकरालङ्कारा विवेचनीयाः ।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समय:

१—

(

(

(ख

२—प्र

(क

(ख

(ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साहित्य प्रथम वर्ष, ...

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] पूर्णाङ्काः—५०

परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—निम्नलिखितेषु पद्यद्वयमेव गीर्वाणवाचा मनोहारिण्या ससन्दर्भभावादि प्रदर्शन पुरस्सरं व्याख्यायताम् । १३

(क) पादस्याविर्भवन्तीमवनतिमवनेरक्षतः स्वैरपातैः
संकोचेनैव दोष्णां मुहुरभिनयतः सर्वलोकातिगानाम् ।
दृष्टिं लक्ष्येषु नोग्रज्वलनकणमुचं बध्नतो दाहभीते-
रित्याधारानुरोधात्त्रिपुरविजयिनः पातु वो दुःखनृत्यम् ॥

(ख) पृथिव्यां किं दग्धाः प्रथितकुलजाभूमिपतयः
पतिं पापे मौर्यं यदसि कुलहीनं वृतवती ।
प्रकृत्या वाकाशप्रभवकुसुमप्रान्तचपला
पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी ॥

(ग) उपलशकलमेतद्भेदकं गोमयानां
वटुभिरुपहृतानां बर्हिषां स्तूपमेतत् ।
शरणमपि समिद्भिः शुष्यमाणाभिराभि
र्विनमितपटलान्तं दृश्यते जीर्णकुडयम् ॥

२—अधोनिर्दिष्टेषु द्वयमेव साधु व्याख्यायताम् । १२

(क) सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति ॥

(ख) उदयति हि शशाङ्कः कामिनी गण्ड-
पाण्डुर्ग्रहगणपरिवारो राजमार्ग प्रदीपः ।
तिमिरनिकरमध्ये रश्मयो यस्य गौराः
स्रुतजल इव पङ्के क्षीर धाराः पतन्ति ॥

(ग) मेघो जलार्द्रमहिषोदरभृङ्गनीलो विद्युत्प्रभारचितपीतपटोत्तरीयः ।
आभाति संहतबलाकगृहीतशङ्खः खंकेशवोऽपर इवाक्रमितुं प्रवृत्तः ॥

अपर पृष्ठम् द्रष्टव्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३—"काव्यस्यात्माध्वनि"रितिध्वनिकारोक्तं पर्यालोच्य विश्वनाथमतेन काव्यस्वरूपं निर्वर्ण्यताम् ।

अथवा

लक्षणास्वरूपनिर्वचनपुरस्सरं गौणीलक्षणा स्पष्टीक्रियताम् ।

४—रसलक्षणं विविच्यताम् ।

अथवा

अनुमानेन व्यञ्जनायाश्चारितार्थ्यं निरसनीयम् ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षः २०२३ (१९६७)

समय :—घण्टात्रयम्] [पूर्णाङ्काः ५०

परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—निम्नाङ्कितेषु गद्यभागेषु कावपि द्वौ भागौ स्वेच्छया स्फुटतरं व्याख्यायेताम् :— २५

(क) हरजटाचन्द्रेणेव कोटिसारेण, मैनाकेनेव अविदितपक्षपातेन, मन्दाकिनीप्रवाहेणेव प्रकटितकनकपद्मराशिना, स्मृतिशास्त्रेणेव सभावसथकूपप्रपारामसुरसदनसेतुयन्त्रप्रवर्त्तकेन, मन्दरेणेव उद्धृतसमग्रसागररत्नसारेण, संगृहीतगारुडेनाऽपि भुजङ्गभीरुणा, खलोपजीविनाऽपि प्रणयिजनोपजीव्यमानविभवेन ।

(ख) सरभससञ्चलनजन्मा मधुरसारणास्फालितवीणारवकोलाहलबहलः, रसनारवाहूतगृहसारसरसितसम्भिन्नः, स्खलितचरणतलताडितमणिसोपानजातगम्भीरध्वनिप्रहृष्टानामवरोधशिखण्डिन केकारवैरनुगम्यमानः, नवजलधररवभय चकितकलहंसकुलकोलाहलकोमलः ।

(ग) महापुरुषमिव मीनमकरकूर्मचक्रप्रकटलक्षणं, षण्मुखचरितमिव श्रूयमाणक्रौञ्चवनिताप्रलापं, भारतमिव पाण्डुधार्त्तराष्ट्रकुलपक्षकृतक्षोभं, अमृतमथनसमयमिव तीरावस्थितशितिकण्ठपीयमानविषम्, कृष्णबालचरितमिव तटकदम्बशाखाधिरूढहरिकृतजलप्रपातक्रीडम्, मदनध्वजमिव मकराधिष्ठितम् ।

२—"यादृग् गद्यविधौ बाणः पद्यबन्धे न तादृशः ।"—इति कस्यचिदुक्तिः समीक्ष्यताम् । ५

३—(१) अधो मनयाम् ।

(२) वर्गेषु युजः पूर्वः ।

(३) भ्यसो हिन्तो सुन्तो ।

(४) द्विवचनस्य बहुवचनम् ।

—एतेषु सूत्रत्रयं व्याख्यायताम्, किन्तु द्वितीयसूत्रन्न हातव्यम् । १०

४—अधोनिर्दिष्टेषु केचित् त्रयः प्रयोगाः साध्यन्ताम् । १०

मोरो, सेज्जा, तरुणई, मासम् इणमो, सणेहो ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समयः—

[क

१—नि

का

२—वि

चू

ता

३—सम

प्रस

संयं

नि

४—श

५—सा

सत्त

त्यस

६—प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा. प्र. ख. प्रा. न्याय

श (१३)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—निर्विकल्पकज्ञानस्यातीन्द्रियत्वं प्रसाध्य विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वम् । ९

२—विषयता च विषयाकारप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः ।। इति चूडामणिः । अत्र स्वरूपसम्बन्धविशेष इत्यस्य स्फुटमर्थमभिधाय ज्ञाततायां मानमुच्यताम् । ९

३—समवायाभावयोरसत्त्वे विशेषणताया अतिरिक्तप्रत्यासत्तित्वं शङ्कोत्तराभ्यां प्रसाध्यताम् । ६

अथवा

संयोगस्य प्रत्यासत्तित्वमुपपाद्य द्रव्यचाक्षुषे सहकारिकारणं सहकारित्वनिर्वचनमुखेन निरुच्यताम् ।

४—शब्दस्य पृथङ्मानत्वं संक्षेपेण प्रसाध्यताम् । ८

५—साध्यवदन्यावृत्तित्वस्य स्वाधिकरणावृत्तिसाध्यवदन्योन्याभावकत्वार्थकत्वे सत्तावान् जातेरित्यादौ वृत्त्यप्रसिद्धिनिबन्धनाव्याप्तिविरहेण "अथवे" त्यस्यावतरणं कथं सङ्गतमिति दिनकरोक्तदिशा प्रतिपाद्यताम् । ९

६—प्रतियोगिव्यधिकरणत्वं सहेतुकं विविच्यताम् । ६

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा. प्र. ख. प्रा. न्याय

श (१४)

वर्ष: २०२३ (१९६७)

समय :—घण्टात्रयम्] [पूर्णाङ्का: ५०

[क] परीक्षार्थिभि: प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

[ख] सर्वे प्रश्ना: समानमानार्हा:, केचन पञ्चैव समाधेयाः ।

१—उपस्कारसम्मतं द्रव्यगुणकर्मणां साधर्म्यं निरूपणीयम् ।

२—परमतनिरसनपुरस्सरं सामान्यस्य लक्षणं प्रदर्शनीयम् ।

३—काले लिङ्गं प्रदर्श्य तस्य नानात्वं निराकरणीयम् ।

४—"एतेन विभागो व्याख्यात:" उपस्कारमुपजीव्य सूत्रमिदं सविस्तरं व्याख्येयम् ।

५—अन्योन्याभावस्य प्रत्यक्षत्वे युक्तय: प्रदर्शनीया: ।

६– पराभिमतं पदपदार्थयो: शब्दबोधौपयिकं सम्बन्धं प्रत्याख्याय तत्र स्वसिद्धान्त: स्थापनीयः ।

७—सुखदु:खयोर्ज्ञानविशेषरूपत्वम् न वेति निपुणं निरूपणीयम् ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा. पू. प्रा. न्याय

वर्ष: २०२३ (१९६७)

समय:—घण्टात्रयम्] [पूर्णाङ्का:—५०

(क) परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—प्रमाणप्रमेयसंशयप्रयोजनेत्याद्यारभ्य निग्रहस्थानानामित्येतदन्तस्य समस्त-सौत्रपदस्य व्यासवाक्ये प्रयुज्यमानेषु प्रमाणादिपदेषु प्रत्येकं पदमेक-वचनान्तं वेति तेषां तेषां मतानुसारेण निरूप्य तेषु कः खलु पक्षो वृत्ति-कृते रोचत इत्येतद्विविच्यताम् । १०

अथवा

निग्रहस्थानेषु हेत्वाभासस्य परिगणितत्वात् पदार्थपरिगणनायां कथं पुन-स्तस्य स्वातन्त्र्येणोल्लेखः ? प्रश्नोऽयं परमतनिरसनपूर्वकं समाधीयताम् ।

२—'समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायाद्वा न संशयः' सूत्रमिदं व्याख्याय 'कुतः पाठक्रममनादृत्य संशय एव प्रथमं परीक्षित आचार्येण ? इति निपुणं निरूप्यताम् । १०

३—'तदभावः सात्मकप्रदाहेऽपि नित्यत्वात्' सूत्रमिदं कं सिद्धान्तमधिक्षिपतीति विमृश्य व्याख्येयम् । १०

अथवा

'ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्' इत्येत्सूत्रं पूर्वपक्षज्ञापकं सिद्धान्त-प्रतिपादकं वा ? पूर्वपक्षज्ञापकं चेत् कोऽसौ पूर्वपक्षः ? स च कया रीत्या कं न्यायसिद्धान्तं विरुणद्धि ? इत्येतत्प्रश्नजातं समाधेयम् ।

४—शरीरव्यापकत्वात् त्वगाख्यमेकमेवेन्द्रियं स्थानोपाधिभेदाद्रूपरसादिकमपि गृह्णातीति मतं निरस्य अत्र सिद्धान्तः प्रदर्शनीयः । १०

५—अनुत्पत्तिसमाया जातेर्लक्षणं सोदाहरणं निरूप्य तस्या असदुत्तरत्वं निरूपणीयम् । १०

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्री प्रथम वर्ष वेदान्त

श (१६)

वर्षः २०२३ (१९६७)

समयः--घण्टात्रयम् [[पूर्णाङ्काः--५०

आद्येषु षट्सु चतुर्थमपरित्यजता चत्वारः अन्त्येषु नवममपरित्यजता प्रश्नद्वयं समाधीयताम् ।

१--ज्ञानगतस्य प्रत्यक्षत्वस्य पर्यवसितं प्रयोजकं समुपस्थाप्य वृत्तिविषयक वृत्तिः स्वीकर्तव्या न वेति विचारयत । ९

२--परमत निराकरणपूर्वकं स्वमतेनानुमिति हेतव उपन्यसनीयाः एवमुपमान-स्वरूपमुपवर्ण्य तस्य प्रमाणान्तरत्वं व्यवस्थापनीयम् । ९

३--आकांक्षायाः किं लक्षणम्? बलाबलाधिकरणस्य च किं स्वरूपम्? तस्य आकाङ्क्षानिरूपणावसरे च क उपयोग इति सर्वं स्फुट-मुपस्थाप्यताम् । ९

४--वेदस्य पौरुषेयत्वमपौरुषेयत्वं वाऽभिमतमिति परिभाषादिशा विचार्यताम् । ९

५—प्रामाण्यस्य उत्पत्तौ ज्ञप्तौ च स्वतस्त्वं कीदृशमभिमतं कथञ्च तत्साधितम् । ९

६--ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्यप्रारब्धकर्मणोऽपि निवृत्तेः कथं ज्ञानिनो देहधारणमिति शङ्का समाधेया । ९

न्यायमध्यमोत्तीर्णानां कृते

७—वेदप्रामाण्यमित्थं वं समाख्याबलतस्तु यत् ।
वेदानित्यत्वमे वाहुस्तन्निराक्रियतेऽधुना ॥
अधिकरणमिदं समुपस्थाप्यताम् । ७

८--लिङ्गं वाक्यस्य बाधकमित्ययं सिद्धान्तः पूर्वपक्षोत्तरपक्षप्रदर्शनपूर्वकं व्यवस्थाप्यताम् । ७

९—क्रत्वर्थपुरुषार्थ विवेकः कस्मिन्नध्याये कृतः, तस्यावश्यकताऽस्ति नवेति च समाधीयताम् । ८

१०—'निषेधमात्रं लशुनाशनादौ' इत्यादिना प्रतिपादितः कलञ्जन्याय उपस्थाप्यताम् । ७

अपर पृष्ठे द्रष्टव्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्येषां कृते

७—शाब्दीभावनाऽर्थीभावनयोः स्वरूपं तयोरंशत्रयञ्च समुपस्थाप्य यजेत स्वर्गकाम इत्यत्रान्वयबोधप्रकार उपस्थाप्यताम् । ७

८—श्रुतिलिङ्गयोः कस्य प्राबल्यमिति सयुक्ति सोदाहरणञ्च स्फुटीकुरुत । ७

९—उद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दस्य कर्मनामधेयत्वं गुणसमर्पकत्वं वेति विचार्यताम् । ८

१०–पर्युदासस्वरूपं सोदाहरणं विलिख्यताम् । ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्री प्रथम वर्ष वेदान्त

श (१७)

वर्षः २०२३ (१९६७)

समय:—घण्टात्रयम्] [पूर्णाङ्का:—५०

[क] परीक्षार्थिभि: प्रश्नोत्तरं यथासम्भवं स्वकीयै: शब्दैर्लेखनीयम् ।

[ख] एषु यथेच्छं पञ्चैव समाधेया: । सर्वे प्रश्ना समानाङ्का: ।

१—विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ सप्रसङ्गमयं मन्त्रो व्याख्येय: ।

२—आत्मशरीरबुद्धिमनइन्द्रियविषयाणां रथ्यादिपरिकल्पनां स्पष्टीकृत्य परमपद-प्राप्तिप्रकार: प्रदर्शनीयः ।

३—तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा ३ इतीन्न्यमीमिषदा ३ इत्यधिदैवतम् ॥ अस्याशय: स्फुटीक्रियताम् ।

४—शैव्येन सत्यकामेनोङ्काराभिध्यानं कथं श्रुतं सर्वं विशदयत ।

५—ओंकारस्य प्रथमद्वितीयपादयोर्वर्णनं सविस्तरं लिखत ।

६—कर्मणोऽसारत्वं दु:खमूलत्वं च प्रदर्श्य तन्निन्दापूर्वकं श्रोत्रियब्रह्मनिष्ठ गुरुवभि-गमनं कथं मुण्डकोपनिषदि प्रतिपादितं तद्विवृणुत ।

७—त्रिशङ्कोर्वेदानुवचनं व्याकरणीयम् ।

८—ईश्वरस्य शरीरप्रवेशविचारं तत्प्रवेशप्रकारश्च प्रतिपादयत ।

९—धर्मस्य स्कन्धत्रयं प्रदर्श्य ओंकारस्य सर्वरूपत्वं विवेचनीयम् ।

१०—जात एव न जायते कोन्वेनं जनयेत् पुन: । विज्ञानमानन्दं ब्रह्म रातिर्दातु: परायणं, तिष्ठमानस्य तद्विद इति । व्याख्येयोऽयं मन्त्र: सप्रसङ्गम् ।

११—उपनिषच्छब्दार्थप्रदर्शनपूर्वकं निर्धारितोपनिषदां शान्तिपाठप्रकारान् प्रदर्शयत ।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्री प्रथम वर्ष वेदान्त

श (१८)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम्।

[ख] पञ्च प्रश्नाः समाधेयाः समानाङ्केषु सप्तसु।

न्यायमध्यमोत्तीर्णानां कृते

१—तद्वचनादाम्नायस्य प्रामाण्यमिति सूत्रमुपस्काररीत्या व्याख्याय दुःखात्यन्ताभाव एव मुक्तिरिति मतं निराक्रियताम्।

२—'सामान्यं विशेष इति बुद्ध्यपेक्षम्' सूत्रमिदं सम्यग्व्याख्याय वैशेषिकाणां हेत्वाभासा नामग्राहं गण्यन्ताम्।

३—'साध्याप्रसिद्धिर्वैषम्यं व्यर्थतोपनयस्य च। अन्वयेनैव सिद्धिश्च व्यतिरेकिणि दूषणम्' इति कारिकार्थ उपपाद्य निरस्यताम्।

४—सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशय इति सूत्रार्थं विशदय्य संशयसामान्यलक्षणं परिष्क्रियताम्।

५—प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्च यथाऽऽत्मनो लिङ्गानि तथा प्रतिपाद्यताम्।

६—संयोगाभावे विभागव्यवहारादेवोपपत्तौ विभागात्मकातिरिक्तवस्तुस्वीकारे तस्य च गुणत्वे युक्तिः प्रदर्श्यताम्।

७—'अस्येदं कार्यंकारणं संयोगिविरोधिसमवायि चेति लैङ्गिकम्' सूत्रमिदं सोदाहरणं व्याख्याय कृतसमवाया अकृतसमवाया वा चेष्टायाः कुत्र प्रमाणेऽन्तर्भाव इति विचार्यताम्।

अन्येषां कृते

१—पूर्वपक्षव्याप्तेर्निष्कृष्टं लक्षणं तत्परित्यागबीजञ्चोपदर्श्य व्याप्तिसिद्धान्तलक्षणं कुत्रचिल्लक्ष्ये सङ्गमनीयम्।

२—हेत्वाभाससामान्यलक्षणं व्याख्याय बाधविरोधासिद्धिज्ञानेषु कस्यानुमितिविरोधित्वं कस्य वा तत्करणप्रतिबन्धकत्वमिति स्पष्टं प्रतिपादनीयम्।

३—शक्तेः स्वरूपं निरूप्याख्यातस्य कृतौ शक्तत्वे चैत्रोगच्छतीत्यादौ चैत्रादिपदोत्तरं तृतीयापत्तिर्निवारणीया।

अपर पृष्ठे द्रष्टव्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४--लक्षणायामन्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वाबीजमिति विविच्य मनसोऽणुत्वे युक्तिः प्रदर्शनीया ।

५--इन्द्रियग्राह्यगुणा अमूर्तगुणाः कर्मजगुणा अव्याप्यवृत्तिगुणाश्च नामग्राहं परिगणनीयाः ।

६--अर्थापत्तेः प्रमाणान्तरत्वं निरस्य 'व्यतिरेकव्याप्तिबुद्धया चरितार्था हि सा यतः' इत्यस्य स्थाने 'अन्वयव्याप्तिबुद्ध्यैव चरितार्था हि सा यतः' इति वक्तुं शक्यते न वेत्यपि विवेचनीयम् ।

७—सुरां न पिवेदित्यत्र विध्यर्थो निरूपणीयः ।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्री पु. वर्ष दर्शनम्

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

मुक्तावल्याम्

१—शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वम् , तमसो दशमद्रव्यत्वञ्च निराकुरुत । १०

अथवा

मानुषादिशरीराणां पार्थिवत्वं संसाध्य, शरीरस्य कर्तृत्वं निराकुरुत ।

२—प्रकृतिः कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः—इत्यादि सांख्यमतं खण्डयत । १०

अथवा

सामान्यलक्षणा ज्ञानलक्षणा च प्रत्यासत्तिः का, कश्च तयोर्भेद इति विज्ञापयत ।

३—पक्षलक्षणं ग्रन्थदिशा निरूपयत, शक्तिग्राहकान् वा लिखत । १०

सोपस्कारवैशेषिकदर्शने

१—सामान्यतोदृष्टाच्चाविशेषः, कारणज्ञानात्—इत्यनयोरेकस्याभिप्रायमुपस्कार-दिशा प्रदर्शयत । १०

अथवा

व्याप्तिस्वरूपमुपस्काररीत्या समर्थयत ।

२—अविद्या—इति सूत्रेण किं ज्ञाप्यते—उपस्काररीत्या निबोधयत । १०

अथवा

बुद्धिपूर्वा वाक्यकृतिर्वेदे—इत्यस्याशयमुपस्काररीत्या प्रकाशयत ।

३—सामयिकः शब्दार्थप्रत्ययः, तयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्याम्—इत्यनयो रेकस्य व्याख्यानमुपस्कारदिशा कुरुत । १०

प्रशस्तपादे

१—प्रशस्तपादरीत्या वायुं तेजो वा निरूपयत । १०

२—प्रशस्तपादभाष्योक्तमसिद्धहेत्वाभासम्, मोक्षं वा वर्णयत । १०

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समय

१—

२—

३—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

शा. पू. व. दर्शनम्

श (२३)

वर्षः २०२३ (१९६७)

समय :—घण्टात्रयम्] [पूर्णाङ्काः ५०

[क] परीक्षार्थिभि: प्रश्नोत्तरं यथासम्भवं स्वकीयै: श० दैर्लेखनीयम् ।

१—'दु:खत्रयाभिघाताज्जिज्ञासातदप०' इतिकारिकां कौमुदीमाश्रित्य व्याख्याय किं प्रकृतित्वम् ? किं विकृतित्त्वम् ? किं च प्रकृतिविकृतित्त्वमित्यपि-निरूप्यताम् । १५

अथवा

"प्रतिविषयाध्यवसायोदृष्टम्" इतिकारिकांशंव्याख्याय, चक्षुरादि-प्रमाणाद् घटपदादिप्रमेयानामुत्पत्यदर्शनात् "प्रमेयसिद्धिः प्रमाणाद्धि" इति कथं सङ्गच्छते तदपि प्रदर्श्यताम् ।

२—उपमानस्यार्थापत्तेश्च प्रमाणान्तरत्वं निरस्य "कारणाभावाच्च सत्कार्यम्" इति कारिकांशं सोदाहरणं व्याख्यायताम् । १५

अथवा

(केवलं दर्शनविषयकमध्यमोत्तीर्णच्छात्राणां कृते)

(१) "अथ त्रिविधदु:खात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ: ।" सूत्रमिदम् अत्यन्तपदद्वयस्य प्रयोजनप्रदर्शनपूर्वकं भाष्यानुसारं व्याख्याय दु:खानां द्विक्षणावस्थायित्वात्तेषां निवर्तनस्य न साधनापेक्षा इति शास्त्रा-रम्भस्य वैयर्थ्यं परिह्रियताम् । १५

अथवा

"तस्मिंश्चिद्दर्पणेस्फारे समस्ता वस्तुदृष्टय: । इमास्ता: प्रतिबिम्बन्ति सरसीव तटद्रुमा: ।" भाष्ये स्मृतमिदं पद्यं व्याख्याय, "दु:खनिवृत्ति-स्तु कण्टकादि निवृत्तिवत् तादर्थ्येन स्वत:पुरुषार्थ:" इति भाष्य-वाक्यस्य तात्पर्यार्थो निदर्श्यताम् ।

(२) द्वयोरेकतरस्य वाप्यसन्निकृष्टार्थपरिच्छित्ति:प्रमा तत्साधकतमं यत्तत् त्रिविधं प्रमाणम्" सूत्रमिदं भाष्यमाश्रित्य व्याख्यायताम् । १५

३—यदविद्याविलासेन भूतभौतिकसृष्टय: । तं नौमि परमात्मानं सच्चिदानन्द-विग्रहम् ।।" पद्यमिदं सम्यग् व्याख्यायताम् । १०

अपर पृष्ठं द्रष्टव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४—चैतन्यस्य विविधत्वं वृत्तिपदार्थश्च प्रदर्श्य, "उपाध्योरेकदेशस्थत्वेसत्ये-ककालीनत्वस्यैवोपधेयाभेद प्रयोजकत्वाद्" इति वाक्यं सोदाहरणं समर्थ्यताम् । १०

अथवा

लक्षणायाःभेदाः सोदाहरणं निरूप्यन्ताम् ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रा. पु. व. दर्शनम्

श (२४)

वर्षः २०२३ (१९६७)

समयः— घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

[ख] सर्वे प्रश्नाः समानाङ्काः । एषु यथेच्छं केचित् पञ्च प्रश्नाः समाधेयाः ।

१—बौद्धदर्शनरीत्या बाह्यपदार्थखण्डनं बाह्यार्थानुमेयवादं वा सविस्तरं प्रदर्शयत ।

२—'नन्वविद्ययेत्यत्र किमाश्रीयते' इत्यादिग्रन्थमतमवलम्ब्याऽविद्या वर्णनीया ।

३—शुक्तिका रजतवदवभासत इति दृष्टान्तो नेष्ट' इति ग्रन्थमवलम्ब्याविकलं पूर्वपक्षः प्रदर्शनीयः ।

४—मायाशब्दार्थप्रतिपादनपुरःसरं भेदप्रतिपादनं पूर्णप्रज्ञदर्शनरीत्या विधेयम् ।

५—परमेश्वरस्याप्रवर्तकत्त्वं कथम् ? प्रकृतिपुरुषसंबन्धश्च कीदृशः ? सर्वं विवेचनीयम् ।

६—यस्यानवयवः स्फोटो व्यज्यते वर्णबुद्धिभिः
सोऽपि पर्यनुयोगेन नैकेनाऽपि विमुच्यते ॥
पूर्वापरग्रन्थप्रदर्शनपूर्वकं व्याख्येयोऽयं श्लोकः ।

७—ईश्वरसिद्धि जगन्निर्माणप्रयोजनं चाक्षपाददर्शनानुसारेण विशदीकुरुत ।

८—अथातः पशुपतेः पाशुपतयोगविधिं व्याख्यास्याम इत्यस्यार्थः स्फुटीक्रियताम् ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वमीमांसा

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

सूचना—अधस्तनेषु केऽपि पञ्चैव प्रश्नाः समाधेयाः । न्यायमाला-विस्तरः—निवीतान्तः ।

१—माधवशैलीपरिशीलनपूर्वकं धर्मस्य लक्षणं सविशदं विविच्य वेदाऽपौरुषेयत्वं सोपपत्तिकं व्यवस्थापनीयम् । १०

२—मन्त्रस्य ब्राह्मणस्य च कीदृशे लक्षणे माधवाचार्येण प्रतिपादिते ? इति सम्यग् विविच्य बलाबलाधिकरणस्वरूपं सप्रयोजनमुपपादनीयम् । १०

३—'साधूनेव प्रयुञ्जति, नत्वपभ्रंशान्' इत्यत्र किं नियामकमिति सविस्तरं निरूप्य तदर्थं व्याकरणस्य गमकत्वं संगमयितव्यम् । १०

४—'उद्भिदा यजेत पशुकामः' इत्यस्य गुणविधित्वं नामधेयत्वं वेति माधवप्रदर्शितसरण्या व्यवस्थाप्य 'त्रिवृद्बहिष्पवमानम्, पञ्चदशान्याज्यानि, सप्तदशानि पृष्ठानि' इत्युद्धृतवाक्यनयार्थविवरणं विधेयम् । १०

५—अपूर्वस्वीकारे सोपपत्तिकं प्रमाणमुपपाद्य, गुरुणा कीदृशमपूर्वं स्वीकृतमिति माधवशैलीं परिशील्यैव विवेचनीयम् । १०

६—"देवोपसदनं बर्हिर्दामिगीर्मुख्यगौणयोः । तल्लिङ्गमर्थयोर्मन्त्रं नियुंक्ते मुख्य एव वा ।" इत्यस्य श्लोकस्य सप्रकरणं तात्पर्यमाविष्कृत्य मातुलकन्या विवाहस्य वैधत्वमवैधत्वं वेति सम्यग् निरूपणीयम् । १०

७—निम्नप्रतिपादितशब्दानां सविवरणमर्थाः समुल्लेखनीयाः—स्वधितिः, निवीतम्, चमसम्, उपांशु, प्रयाजः, दर्व्विः, अहीनः, जाघनी, ईषा । १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वमीमांसा

श (२६)

वर्षः २०२३ (१९६७)

समयः— घण्टात्रयम्] [पूर्णाङ्काः —५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।
[ख] सर्वे प्रश्नाः समानाङ्काः (क) वर्गे त्रयः, (ख) वर्गे च द्वाविति पञ्च प्रश्नाःसमाधेया

(क) कात्यायनश्रौतसूत्रे

१—फलयुक्तानामारम्भे यथाकामी फलार्थित्वात् । विगुणे फलनिर्वृतिरङ्ग-प्रधानभेदात् । चोदिताभावेऽनारम्भस्तत्सिद्धित्वात्तस्य । शब्देऽविप्रतिपत्तिः । विकल्पे प्रवृत्तं कर्मान्तरत्वात् । अर्थद्रव्ययोर्विरोधेऽर्थसामान्यं तत्परत्वात् । अह्नांवाऽशक्यत्वात् ।

एषु कानिचित्पञ्चसूत्राणि कर्कभाष्यानुसारेण व्याख्येयानि ।

२—सूत्रद्वयं कर्कभाष्यदिशा विचार्यताम्—
(क) पूर्वां पौर्णमासीमुत्तरां वोपवसेत् ।
(ख) अपराह्णे व्रतोपायनमश्नीतः सर्पिषाऽसुहितौ ।
(ग) उभौ वा विशेषात् ।

३—उपसर्जन्यः, शम्या, दृषद्, अग्निहोत्रहवणी, पत्नीसंनहनम्, स्तम्बयजुः, साकमेधः, निरूढपशुबन्धः, अध्वर्युः, शमिता ।

एषु पञ्चानां याज्ञिकप्रसिद्धा अर्था लेख्याः ।

४—त्रयाणामुत्तरमपेक्षितम्—
(क) आधानाख्यं कर्म किमर्थं क्रियते ?
(ख) दर्शपूर्णमासौ कियत्कालावधि अनुष्ठेयौ ?
(ग) पुनराधाने किं निमित्तम् ?
(घ) दर्विहोमाः किं प्रकृतिकाः ?

(ख) शतपथ ब्राह्मणे

५—'पुरुषं ह वै देवा अग्रे पशुमालेभिरे । तस्यालब्धस्य मेधोऽपचक्राम' ।

अनेन सम्बद्धा कथा पूरणीया ।

अपर पृष्ठं द्रष्टव्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६—अधस्तनसन्दर्भौ स्फुटं व्याख्येयौ—

३—वसन्तकालः सरसया भवद्गद्यगिरा स्वकीयवर्णनमपेक्षते । ६

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समय

१—

२—

३—

४—

५—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MUF

शास्त्री २वर्ष ५'वर्ष
साहित्य २पत्र

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—दोषसामान्यलक्षणं प्रदर्श्य च्युतसंस्कारत्वामतपरार्थत्वनिर्हेतुत्वविभावकष्टकल्पनदोषाणां लक्षणानि लक्ष्येषु सङ्गमयत । १०

अथवा

विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा ।
भवेद्विरोधो नान्योन्यमङ्गिन्यङ्गत्वमाप्तयोः ॥
इतिकारिकामुदाहरणमुखेन व्याख्यात ।

२—"तेन नार्थगुणाः पृथक्" इति कारिकांशं विशदं समर्थयत । १०

३—शब्दश्लेषस्यालङ्कारान्तरविविक्तविषयत्वं संसाध्य पर्यायोक्तसामान्यपर्यायभाविकालङ्कारेषु यथेच्छं त्रीन् लक्ष्येषु संघटयत । १०

४—इदमाभाति गगने भिन्दानं सन्ततं तमः ।
अमन्दनयनानन्दकरं मण्डलमैन्दवम् ॥
इति पद्ये सम्भावितानलङ्कारानुल्लिखत । ५

५—नाट्यवेदाविष्करणे हेतुं प्रदर्श्य मण्डपरक्षणोपायं निर्दिशत । १५

अथवा

अवान्तरभेदसहितं प्रेक्षागृहसन्निवेशप्रकारं स्पष्टं विवृणुत ।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF
शास्त्री २ वर्ष प्रा. न्याय १ पत्र

न्न (१३)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—नैयायिकमतेनात्मनः प्रत्यक्षत्वमुपपाद्य भूतचैतन्यवादो निराक्रियताम् । १०

२—इन्द्रियाणां भौतिकत्वे युक्तिं प्रदर्श्य तेषामाहङ्कारिकत्वे न्यायमञ्जरी-प्रदर्शितदिशा दोष उद्भावनीयः । १०

३—बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमितिसूत्रप्रणयनस्य प्रयोजनं प्रतिपाद्य मनसः प्रतिशरीरमनेकत्वे दोषः प्रदर्शनीयः । ५

४—आत्मख्यातिवादिनः के ? किञ्च तन्मतम् ? कथञ्च तन्निराकृतं न्यायमञ्जरी-कृता ? इति सर्वं समाधीयताम् । १०

५—न्यायविन्दुग्रन्थस्य शिष्यप्रवृत्त्यङ्गमनुबन्धचतुष्टयं प्रोच्य मनोविज्ञानलक्षणं तल्लक्षणवाक्यघटकप्रतिपदविवेचनपूर्वकं प्रतिपाद्यताम् । ५

६—धर्मकीर्तिनिर्दिष्टे लिङ्गस्य भेदोपयोगित्वे प्रदर्शनीये । ५

७—परार्थानुमानं व्याख्याय प्रयोगभेदनिबन्धनस्तद्भेद उदाहरणमुखेन व्याक्रियताम् । ५

अथवा

धर्मकीर्त्त्यभिमतेषु हेत्वाभासेषु कस्यचिदेकस्य परिचयो देयः ।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्र (१४)

वर्ष: २०२३ (१९६७)

समय:—घण्टात्रयम्] [पूर्णाङ्का:—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैरुट्टङ्कनीयम् ।

१—ईश्वरमननस्योदयनाभिप्रेतं फलं सम्यग् विविच्य लिख्यताम् । ८

२—दानाध्ययनादीना जगद्वैचित्र्यहेतुत्वस्वीकारे दोषः उदयनदिशा विवेचनीयः । ८

३—उदयनसम्मतः प्रतिबन्धकशब्दार्थो निरूपणीयः । ८

४—शक्तेरुदयनसम्मतं स्वरूपं विशदं विलिख्यताम् । ८

५—उपक्रमनिर्देशपुरस्सरं व्याख्यायन्तामधोनिर्दिष्टाः कारिकाः । ६

(क) हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च ।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥

अथवा

जयेतरनिमित्तस्य वृत्तिलाभाय केवलम् ।
परीक्ष्य समवेतस्य परीक्षाविधयो मताः ॥

(ख) जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मयोः । ६
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम् ॥

(ग) शङ्काचेदनुमास्त्येव न चेच्छङ्का ततस्तराम् । ६
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः ॥

अथवा

भावनैव हि यत्नात्मा सर्वत्राख्यातगोचरः ।
तया विवरणध्रौव्यादाक्षेपानुपपत्तितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रा.न्या. शास्त्री २ वर्ष २ पत्र

न्न (१५)

वर्षः २०२३ (१९६७)

समय :—घण्टात्रयम्] [पूर्णाङ्काः ०५

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।
[ख] सर्वे प्रश्नाः समानमानाः । तेषु पञ्चैवोत्तरणीयाः ।

१—शाब्दाख्यमतिरिक्तमनुभवमभ्युपेत्यापि तत्र प्रमात्वं के के नाङ्गीकुर्वन्ति ? कीदृशश्च तत्संमतप्रमात्वनिष्कर्षः ? का वा तन्मतसाधनबाधनकुशला वाचोयुक्तयः ? सर्वमेतत्स्फुटतरमुत्तरयत ।

२—सपदकृत्यं निपातलक्षणं निर्दिश्य जातौ सत्ता नास्तीति ग्रन्थस्योत्थितौ बीजमन्वयबोधप्रकारश्चोपवर्णयत ।

३—प्राभाकरसंमतं जातिशक्तिवादं समुपन्यस्य जगदीशदर्शितदिशा निराकुरुत ।

४—"अपङ्कजवृत्तिः सत्त्वेत्यादौ 'स्खलदक्षरसंशोभि तरुण्या मुखपङ्कजम्, इत्यादौ च व्यभिचारादुक्तव्युत्पत्तेः संकोचेनेति गृहाण, इति जगदीशः । अत्र पृच्छ्यते काऽसावुक्तव्युत्पत्तिः ? किं मूला च ? का वा तद्घटकप्रतिपदव्यावृतिः ? कश्च तत्संकोचप्रकार इति सर्वमिदं सम्यगुपपादयत ।

४—संख्या शब्दयुतं नाम तदलक्ष्यार्थबोधकम् ।
अभेदेनैव यत्स्वार्थे स द्विगुस्त्रिविधो मतः ॥
श्लोकमिमं सपदकृत्यं व्याख्याय द्विगोः कर्मधारयान्तर्गतत्वं नवेति सयुक्ति विवेचयत ।

६—विभक्तिलक्षणे जातिपदोपादानप्रयोजनं प्रतिपाद्य अक्ष्णा काण इत्यत्र सपदार्थं वाक्यार्थं वर्णयत ।

७—ग्राम गच्छतीत्यत्र कर्मत्वलक्षणं संगमय्य प्रत्येकपदार्थप्रतिपादनपूर्वकं वाक्यार्थबोधप्रकारं प्रदर्शयत ।

८—सपदकृत्यं लिङो लक्षणं लिखित्वा स्वर्गकामो यजेतेत्यत्रान्वयबोधरीतिं न्यायसिद्धान्तानुरूपां निरूपयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

ब्रह्मसूत्रशाङ्करभाष्यप्रश्नाः

१—अथातो ब्रह्मजिज्ञासा—इति सूत्रस्य भाष्यदिशा व्याख्यानं कुरुत। १०

अथवा

आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि—इत्यत्र वैश्वानरशब्देन किं गृह्यते ? भाष्यरीत्या लिखत।

२—शूद्रस्य विद्यास्वधिकारो नवेति भाष्यदिशा प्रतिपादयत। १०

अथवा

"आत्मा व अरे द्रष्टव्यः" इत्यत्रात्मशब्देन किं गृह्यते, ग्रन्थरीत्या निबोधयत।

३—"एतेन योगः प्रत्युक्तः" इति सूत्रेण किं खंड्यते, कथञ्चेति भाष्यमनुसृत्य प्रदर्शयत। १०

अथवा

ईश्वरे वैषम्यनैर्घृण्यदोषौ निराकुरुत।

भामत्याम्

१—देहाद् भिन्नोऽभिन्नो वाऽऽत्मेति विविच्य, आत्मनोऽणुपरिमाणत्वं देहपरिमाणत्वञ्च भामतीदिशा खण्डयत। १०

अथवा

अथातो धर्मजिज्ञासेत्यनेनैव सिद्धे "अथातो ब्रह्मजिज्ञासा—इति सूत्रं नारब्धव्यमिति शङ्का भामतीदिशा समाधत्त।

२—ब्रह्मणः प्रतिपत्तिविधिविषयत्वं नवेति भामतीरीत्या विज्ञापयत। १०

अपरं पृष्ठं द्रष्टव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा-श्रीभाष्ये

१—अथातो ब्रह्मजिज्ञासेत्यस्य विवेचनं श्रीभाष्यदिशा विधत्त । १०

२—"शास्त्रयोनित्वात्" इति सूत्रं श्रीभाष्यरीत्या वर्णयत । १०

अथवा

"तत्तु समन्वयात्" इत्यस्य कोऽर्थोऽव्यधायि श्रीभाष्यकृतेति सुस्पष्टं वदत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्तः

त्र (१७)

वर्षः २०२३ (१९६७)

समयः — घण्टात्रयम्] [पूर्णाङ्काः—५०

भामत्यां द्वौ, भाष्ये च त्रयः इति पञ्च प्रश्नाः समाधेयाः ।

१—परमाणुकारणवादो भामत्युक्तदिशा निराक्रियताम् ।

२—वैशेषिकाणामर्धवैनाशिकत्वे हेतुमुपस्थाप्य माध्यमिकसिद्धान्तखण्डनप्रकार उपवर्ण्यताम् ।

३—जैनसम्मतानां पदार्थानां भामत्युक्तदिशा स्वरूपमुपस्थाप्यताम् ।

४—'अंशोनानाव्यपदेशादित्यादिसूत्रं भाष्यदिशा व्याख्यायताम् ।

५—मुग्धेऽर्धसम्पत्तिः परिशेषादित्याद्यधिकरणं समुपस्थाप्यताम् ।

६—यावदधिकाराधिकरणं वर्ण्यताम् ।

७—तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् इत्यत्र बाल्यशब्देन किं विवक्षितमिति प्रसाध्यताम् ।

८—ये सगुणब्रह्मोपासनया सहैव मनसेश्वरसायुज्यं व्रजन्ति तेषां कीदृशमैश्वर्यं भवतीति प्रश्नः सप्रमाणं समाधीयताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समय

१—

२—

३—

४—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्तः

त्र (१८)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—चित्रदीपप्रतिपादितं परमात्मनोऽवस्थाचतुष्टयं सम्यग्विवृत्य मायास्वरूपं विमृशत ।

अथवा

"संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥"

इति श्लोकं सम्यग्व्याख्याय तत्त्वमसीति वाक्यस्यार्थं विशदयत । १२

२—"एवं हि सर्वथा बुद्धैरजातिः परिदीपिता ।"

इति कारिका किमर्थं प्रववृते ? अजातिं कारिकोक्तयुक्तिभिः समर्थयत ।

अथवा

"न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्नवै मुक्त इत्येषा परमार्थता ॥"

इमां कारिकां सोपपत्तिकं व्याख्यात । १२

३—मुक्तौ किं साक्षात्कार एव कारणम् उत ज्ञानकर्मणी समुच्चिते ? गीतामवलम्ब्य भाष्योक्तयुक्तिभिः सिद्धान्तं निर्वहत ।

अथवा

कर्मण्यकर्मदर्शनमकर्मणि कर्मदर्शनं च स्पष्टीकृत्य तद्वतोयुक्ततां कृत्स्नकर्मकृत्तां च साधयत । ९

४—गुणातीतस्य लक्षणमाचारं गुणातीतत्वोपायञ्च सम्यग्विशदीकुरुत । ८

अपर पृष्ठं द्रष्टव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५—"क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम" इत्यत्र कीदृक् ज्ञानमभिप्रेतम् ? ज्ञानसाधनानि कानि ? ज्ञेयस्वरूपं किम् ? सप्रमाणं विशदयत ।

अथवा

प्रकृतिसदृशमेव यदि सर्वो जन्तुः चेष्टते तदा पुरुषकारस्य कुतो न वैयर्थ्यम् ? सप्रमाणं सुविशदं समाधत्त । ९

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्मशास्त्र १

त्र (१६)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

[ख] सर्वे प्रश्नाः समानाङ्काः, तेषु पञ्चैव समाधेयाः

१—श्लोकद्वयस्य व्याख्या क्रियताम् :—

प्रत्यक्षादिभिरप्येष गम्यते विधिनैव वा ।
अक्षादीनां प्रमाणत्वान् मेयधर्मविभासिता ॥
वर्तमानैकविषयमक्षं धर्मस्तु भाव्यसौ ।
अक्षमूलोऽनुमानादिस्तेन विध्येकमेयता ॥

२—धर्मे स्मृतेः प्रामाण्यं नवा ? न्यायमालाविस्तरोक्तदिशा निर्णीयताम् ।

३—र्विहिराज्यपुरोडाशशब्दाः संस्कारवाचिनो वा जात्यर्थाः ? माधवाचार्योक्ति-दिशा समाधीयताम् ।

४—ददाति, यजति, जुहोतीत्यादौ भावनैक्यम् उत अन्यता ? विशदीकृत्य लिख्यताम् ।

५—श्लोकौ व्याख्येयौ

संमार्ष्टि ग्रहमित्येको ग्रहः शोध्य उताऽखिलः ।
एक उद्देशसंख्याया उपादेयवदादरात् ॥
प्राधान्यात्तद्गुणावृत्तेरेकत्वमनपेक्षितम् ।
तद्विधौ वाक्यभेदोऽतो द्रव्योक्त्या सर्वशोधनम् ॥

६ - वायव्यं श्वेतमालभेत भूतिकाम इति गुणविधिर्वा, यावदुक्तविधिर्वा, याग-विधिर्वा ? माधवाचार्यसरणिमनुसृत्य निर्णीयताम् ।

७—निम्नलिखितस्य वचनस्य कोऽभिप्रायः ? स्पष्टीक्रियताम् :—

वाच्यवाचकसंबन्धनित्यता या प्रसाधिता ।
शब्दनित्यतया सा स्यात् तेन तन्नित्यतोच्यते ॥

८—व्याख्या क्रियताम् :—

स्तुतिः क्षिप्रगता वायोः स्तुतिरूर्गवरोधनम् ।
स्तुतिः शूर्पेऽन्नहेतुत्वं मन्त्रस्यार्थो विवक्षितः ॥

९—एकः पदार्थो जनयत्यपूर्वं विधेर्बलात्तावदपूर्वसिद्धिः ।
संस्कारकर्मैव किलावघातः सम्मार्जनं संस्करणं स्रुगादेः ॥
इत्यस्यार्थः स्पष्टीकरणीयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा. २ धर्मशास्त्र २

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

(क)

१—रोहिणीनिमित्तेन कृष्णजन्माष्टम्या भेदानुक्त्वा समतभेदप्रदर्शनं जन्माष्टमीनिर्णयः क्रियताम् । १०

२—मत्स्यादिदशजयन्तीनां कालस्तत्र कर्तव्यविशेषवर्णनसहितः सिन्धुप्रदिष्टदिशोच्यताम् । १०

३—अधस्तनविषयाः सप्रमाणं ससंक्षेपं लिख्यन्ताम्— १०

१ हविष्याणि २ वैशाख शुक्ल तृतीया ३ उपाकर्म ४ विधवाकर्तृकमहालयप्रकारः ५ शिवरात्रिः ।

४—महाष्टमीकालनिर्णयं कृत्वाऽऽशौचे नवरात्रव्रतकार्यसंपादनप्रकारः सप्रमाणं प्रतिपाद्यताम् । १०

५—मकरसंक्रान्तिकालनिर्णयं प्रतिपाद्य तत्र कर्तव्यविशेषो निरूप्यताम् । १०

(क) अत्र विभागे यथेच्छं प्रश्नत्रयी समाधीयताम् ।

(ख)

१—सभेदलक्षणं व्यवहारमुक्त्वा काल-देश-दिव्यभेदसहितं दिव्यं तद्विधिश्च निरूप्यताम् । १०

२—पुत्राऽभावे दायहरणक्रमो लिख्यताम् । १०

३— विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः ।
पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते ॥ १०

मयूखदिशा श्लोकं व्याख्याय निक्षेपः, सम्भूयसमुत्थानम्, उत्कोचः, अभ्युपेत्याशुश्रूषेति पदानामर्थाः सप्रमाणमुच्यन्ताम् ।

४— छद्मना काययेद्यस्तु तस्य सर्वहरो दमः ।
अङ्कयित्वा भगांकेन पुरान्निर्वासयेत्ततः ॥ १०

श्लोकं व्याख्याय स्त्रीपुन्धर्मा निर्दिश्यन्ताम् ।

(ख) विभागे यथाकामं प्रश्नद्वयं समाधीयताम् ।

सूचना—प्रतिभागं (परीक्षोत्तीर्णतार्थं) विशिष्टयोग्यतासंपादनार्थं प्रश्नसमाधानमावश्यकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा'२ धर्मशास्त्र २

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—१००

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

[ख] सर्वे प्रश्नाः समानाङ्काः तेषु पञ्च प्रश्ना एव समाधेयाः किन्तु क वर्गे त्रयोऽवश्यमेव समाधेयाः ख वर्गे च द्वौ समाधेयावेव ।

(क वर्ग)

१—"गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम्" ॥
इतिश्लोकार्द्धं व्याख्याय मिताक्षरोद्धृतं गर्भस्राव-गर्भपातलक्षणपद्यं प्रदर्श्य तत्र तयोराशौचे कीदृशं तारतम्यमिति विविच्यताम् ।

२—ब्रह्महत्याप्रायश्चित्तानि सर्वाणि प्रदर्शयत ।

३—कालोऽग्निः कर्म मृद्वायुर्मनो ज्ञानं तपो जलम् ।
पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ॥
इति श्लोकार्थं मिताक्षरानुसारं लिखत यमांश्च प्रदर्शयत ।

४—अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम् ।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत् प्रभुः ॥
इति व्याख्याय यतिधर्मो लेख्यः ।

(ख वर्ग)

५—पर्षदुपस्थानप्रकारं वर्णयित्वा पर्षद्रूपं वर्णयत ।

६—जातकर्मादिसंस्कारभोजनप्रायश्चित्तं वर्णयत ।

७—अवस्तनो भागो व्याख्येयः—
'ननु पापसत्तायां किं प्रमाणम् ? न च तावद्वेदस्तस्य कार्ये कार्यान्विते वा प्रामाण्यात्, न च दुरितापूर्वं कार्यं कार्यान्वितं वा । न च नित्यकर्माकरणस्य निषिद्धाचरणस्य च वेदोक्त प्रत्यवाय साधनत्वानुपपत्त्या कल्प्यम् । तस्य तथा-विधशब्दाभावेन चावगन्तुमशक्यत्वात् ।

८—ननु किमिदं स्तेयं नाम ? निह्नवो वा, अपलापो वा, गोपनं वा परस्वे परानु-मतिमन्तरेण स्वत्वापादनं वा ? प्रायश्चित्तविवेकानुसारं लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वमीमांसा

त्र (२५)

वर्ष: २०२३ (१९६७)

समय :—घण्टात्रयम्] [पूर्णाङ्काः ५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

[ख] (शास्त्रदीपिकायास्तर्कपादे तौतातितमततिलकस्य प्रथमाध्याये च प्रश्नाः)

१—चोदनालक्षणोऽर्थो धर्म इति सूत्रस्य प्रभाकरकृतं व्याख्यानं वचनव्यक्त्य-संभवप्रदर्शनेन दूषयत । १०

२—मनःसद्भावे प्रभाकरोक्तमनुमानप्रकारं निरस्य स्वमतेन मनःसिद्धिं तस्य चेन्द्रियत्वं समर्थयत । १०

३—अर्थापत्तेः प्रमाणान्तरत्वं प्रभाकरमतनिरसनपूर्वकं समर्थयत । १०

अथवा

विज्ञानवादनिरसनपूर्वकं देहाद्यतिरिक्तात्मास्तित्वं हेतुभिः समर्थयत ।

४—पार्थसारथ्युक्तदिशा भाष्यकारानुसारेण पादार्थो वर्णनीयः । ५

अथवा

वेदापौरुषेयत्वं स्थापनीयम् ।

५—चोदनालक्षणोऽर्थोधर्म इति चोदनायाः प्रामाण्यं प्रतिज्ञातं, तत्प्रामाण्यं च प्रथमे पादे प्रतिपादितमेवेति कथं सिद्धार्थानामर्थवादानामप्रतिज्ञाताप्रस्तुत-प्रामाण्यविचारसङ्गतिरर्थवादपाद इति प्रश्नोऽयं प्रभाकरमतेन भट्टमतेन च सम्यक्समाधेयः । ७ ८

६—आकृत्यधिकरणं भवदेवीयां शैलीमनुसृत्य विरचयत ।

अथवा

अन्यवेश्मस्थिताद्धूमान्नवेश्मान्तरमग्निमत् ।
प्रमीयते न चादृष्टधूमैरिति हि निश्चितम् ॥
अनेन वार्तिकेन कस्य पक्षस्य पुष्टिः कृतेति सम्यङ् निरूपयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्व मीमांसा

त्र (२६)

वर्षः २०२३ (१९६७)

समय :—घण्टात्रयम्] [पूर्णाङ्काः ५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

[ख] सर्वे प्रश्नाः समानाङ्कभाजः केचन पञ्चैव समाधेयाः ।

शास्त्रदीपिकायाम्

१—वैश्वदेवेन यजेत" इत्यत्र वैश्वदेवशब्दस्य कर्मनामधेयत्वं गुणविधित्वं वेति स्फुटं पर्यालोचयत ।

२—"स्रुचः संमार्ष्टि" इत्यत्र सम्मार्गस्य गुणकर्मत्वं प्रधानकर्मत्वं वेति सयुक्तिकं प्रतिपादयत ।

३—"शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात्" इतिसूत्रस्यार्थं दीपिकानुसारं लिखत ।

४—"यदि रथन्तरसामा सोमः स्यात्" इत्यादिश्रुतेः कर्मान्तरविधित्वं निराकृत्य सिद्धान्तपक्षं प्रदर्शयत ।

५—उपवीतस्य दर्शपूर्णमासाङ्गताधिकरणं विवृणुत ।

६—"इन्द्रपीतस्ये"त्यादिमन्त्रस्यानैन्द्रसोमभक्षणकाले पाठः करणीयो नवेति निपुणमुपपादयत ।

७—"ग्रहं सम्मार्ष्टि इत्यत्र ग्रहैकत्वविवक्षापक्षं ग्रन्थोक्तपद्धत्या निराकुरुत ।

अथवा भाट्टदीपिकायाम्

१—मन्त्राणां सार्थक्ये सामर्थ्यादेव "उरु प्रथस्वे"त्यादिमन्त्राणां विनियोगसिद्धौ विनियोगविधीनां वैयर्थ्यं कुतो नेति प्रतिपाद्यताम् ।

२—श्रुतिविरुद्धानाम् "औदुम्बरी सर्वा वेष्टयितव्ये"त्यादि स्मृतीनां प्रामाण्यमप्रामाण्यं वेति विचारणायां वार्तिककारमतमुपपाद्यताम् ।

३—पार्थसारथिसम्मतमाख्यातशक्यतावच्छेदकं निरूप्य "वस्तुतस्तु यत्नत्वमेव शक्यतावच्छेदकं, लाघवात्" इति ग्रन्थस्य चाशयः प्रकाश्यताम् ।

अपर पृष्ठे द्रष्टव्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४—अग्नीषोमीयवाक्ये पशुपदस्य समुदायानुवादत्वं वदतामाशयं प्रकाश्य तत्र सिद्धान्तपक्षः समुल्लिख्यताम् ।

५—यावज्जीवं दर्शपूर्णमासाभ्यां यजेते"त्यत्र यावज्जीवपदस्य णमुलन्तत्वं कालविधित्वेन अथवा निमित्तत्वेनेति निगद्यताम् ।

६—शेषलक्षणाधिकरणमारच्यताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—१००

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।
[ख] मीमांसाभाष्ये तौतातितमततिलके च निर्दिष्टभागे प्रश्नाः ।

१—"अथ गौरित्यत्र कः शब्दः ।... अथ गौरित्यस्य शब्दस्य कोऽर्थः । अथ संवन्वः क इति" भाष्यवाक्यखण्डानां ससंदर्भप्रदर्शनं व्याख्या कार्या । १०

२—यव-वाराह-वैतसशव्दानामर्थनिरूपणप्रसङ्गे समागतानां भाष्यवाक्या-नामाकूतं स्फोटयित्वा पूर्वपक्षं प्रदर्श्य-सिद्धान्तः प्रतिपादनीयः । १०

३—हेतुर्निर्वचनं निन्दाप्रशंसा संशयो विधिः । परक्रिया पुराकल्पो व्यवधारण-कल्पना । उपमानं दशैते तु विधयोब्राह्मणस्य तु । एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणम् । इति पद्यद्वयं सोदाहरणं व्याख्येयम् । १०

अथवा

विषये प्रायदर्शनादिति सूत्रं भाष्यपद्धत्या सम्यग् व्याख्यायताम् ।

४—"फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगत्वात्"
"अतुल्यत्वात्तु वाक्ययोर्गुणे तस्ययो प्रतीयेत" ५
इति सूत्रद्वयं भाष्योक्तदिशा व्याख्येयम् ।

५—अपूर्वाधिकरणे प्रभाकरमतं निरूप्य भाट्टसिद्धान्तः प्रतिपादनीयः । ८

अथवा

संमार्गाधिकरणं भवदेवोक्तसरण्या रचनीयम् ।

६—मासमग्निहोत्रं जुहोतीति वाक्ये पठितस्य अग्निहोत्रशब्दस्य कर्मान्तरत्व-सिद्धिः कथं भवदेवेन प्रतिपादितेति सर्वमपि पदार्थजातं संक्षिप्य निरूपयत । ७

—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा.२ वर्ष ज्योतिष

त्र (२८)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः ५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—अहर्गणात्कल्पगतानयने का युक्तिः ? ७

अथवा

अभीष्टवारार्थमहर्गणश्चेत्, सैको निरेकस्तिथयोऽपितद्वद् ।
तदाधिमासावम शेषके च, कल्पाधिमासावमयुक्तहीने ।। इत्युपपाद्यताम् ।

२—भोग्यखण्डस्य धनुःकरणाय स्फुटीकरणे का वासना ? ७

अथवा

मध्याद्रवेरयनभागयुतादित्यादि प्रकारस्य कोपपत्तिः ? अत्र स्थूलता च का ?

३—लग्नात्कालानयनमुपपाद्यताम् । ७

४—छायातो भुजज्ञानं कथं भवेदिति युक्तिपूर्वकं विवेचनीयम् । ७

५—चन्द्रग्रहणे ग्रासात् तत्कालज्ञानं युक्तिपुरस्सरं विविच्यताम् । ७

६—सूर्यग्रहणे लम्बननती कथमुत्पद्येते कदा तयोरभावः कदा च परमत्व-
मिति सर्वं सयुक्तिकं प्रदर्शनीयम् । ८

७—ग्रहविक्षेपानयनमुपपादनीयम्, तत्र स्थूलताऽपि लेखनीया । ७

अथवा

भानां महति सौम्यशरे रवि सान्निध्यवशादस्तं न भवतीति कथम् ?

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा.२ वर्ष ज्यौतिष

त्र (२६)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

१—चापजात्ये एकभुजज्यया त्रिज्याया या निष्पत्तिः सैव द्वितीयभुजच्छाया द्वितीयभुजसंखुखकोणच्छायाया निष्पत्तिः। इति कथम् ? ८

अथवा

कर्णज्या कोणजीवाघ्नी त्रिज्याभक्ता फलं भवेत् ।
कोणसंमुखवाहुज्या चापजात्याभिधानके ॥ इति कथमुपपद्यते ?

२—एक कोणभया निघ्नी कर्णकोटिज्यकाहृता । ९
त्रिज्यया परकोणस्य कोटिच्छायाफलं भवेत् ॥ इति कथम् ?

३—चापाजात्ये भुजसम्वन्धि कोटिज्ययोर्यानिष्पत्तिः सैवाबाधाकोटिज्ययोर्निष्पत्तिः। इत्युपपादनीयम् ? ८

अथवा

निखिलकोणयुतिर्भदलोनिता परिधिखंडगुणा त्रिगुणाहता ।
खधृतिहृच्चफलं त्रिभुजे फलं भवति गोलजपृष्ठगते सदा ॥
इत्यस्य वासना का ? ८

४—तात्कालिकाख्यसम्वन्धयोगो विद्वन् भवेत्सदा ।
चलराशियुते राशेः सम्वन्धः किल संस्फुटः ॥ इति कथम् ?

५—यदि र = ८ य + ४ तदास्य तात्कालिकः सम्वन्धः कः ? ९

अथवा

$$\text{यदि } र = \frac{७ \, य^{९} + ११}{५ \, य^{७} + ९}$$ तदास्यतात्कालिकः सम्वन्धः साध्यः ?

६—यदि र = स्य (ल य) तदास्यतात्कालिकः सम्वन्धः कः ? ८

अथवा

टेलर महाशयस्य सिद्धान्तः कः ?

—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा.२ वर्ष ज्यौतिष

त्र (३०)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—गोलप्रशंसया गोलानभिज्ञगणकोपहासो गोलस्वरूपञ्च सम्यग्विलेखनीयम् । ८

२—'निरक्षदेशादितरत्र तस्मात् प्राचीप्रतीच्यौ च विचित्रसंस्थे' इति कथमुपपद्यते ? ८

३—'त्रिज्योत्क्रमज्यानिहतेर्दलस्य मूलं तदर्धांशकशिञ्जिनी वा' इत्युपपाद्यताम् । ८

४—छेद्यकेन मन्दकर्मपूर्वकं शीघ्रकर्म कथमुपपद्यते ? ८

अथवा

गतिफलाभावः कुत्र भवतीति सप्रमाणं विलिख्यताम् ।

५—'शीघ्रकर्णेन भक्तास्त्रिभज्या गुणाः स्युरित्यादि पद्यं सोपपत्तिकं प्रतिपाद्यताम् । ८

अथवा

षष्टि घटिकात्मकं दिनप्रमाणं कुत्र कदा च भवतीति निगद्यताम् ।

६—किन्नाम यष्टियन्त्रं तेन कालज्ञानञ्च कथम् ? १०

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समय

१—

२—

३—

४—

५—

६—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शा॰ २००७

२५ व्याकरण

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

[ख] केऽपि पञ्च प्रश्नाः समाधेयाः । सर्वे समानमानाः ।

१—अशूशवत्, अजूहवत्, भीषयते, जिगीषति, धिप्सति, शुशावयिषति, तितांसति, एषु पञ्च प्रयोगाः सूत्रविशेषप्रदर्शनपुरस्सरं साधनीयाः ।

२—अरारिता, चञ्चूर्यते, चेकीयते, जेघ्रीयते, वोभवीति, अजर्घाः, राजानति, एषु पञ्च प्रयोगाः एव साध्याः ।

३—लोहितायति, औजिढ़त्, विद्यामादत्ते, सर्पिषो नाथते; संविद्रते, विरमति, अभावि, एषु केचन पञ्च प्रयोगाः साध्याः ।

४—प्रणिसितव्यम्, वध्यः, आलम्भ्यः, ब्रह्महत्या, स्तुत्यः, चराचरः, ज्ञः, एतेषां केषुचन पञ्चसु कार्यविशेषाः सूत्रोपन्यासमुखेन लेख्याः ।

५—कुम्भकारः, गोदः, वाचंयमः, विजावा, ब्रह्मवादी, उच्छूनः, आसीनः, संपर्की, एषु केऽपि पञ्चैव साध्यन्ताम् ।

६—अधोलिखितेषु वाक्येषु केषांचित् षण्णामेव वाक्यानां तस्मिन् तस्मिन्नर्थे प्रयुक्तम् एकमेकं तिङन्तं पदं लिखतः—

अध्येतुमिच्छति । शयानं प्रेरयति । विभ्यतं प्रेरयति । पुनः पुनः श्वयति, आत्मनः गामिच्छति । सत्यं करोति । विद्वांसमाचष्टे । श्रीमन्तमाचष्टे ।

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—अधोलिखितयोः कारिकयोरेकां कारिकां विवृण्वन्तु - १०

'वृत्तीनां विश्रान्तेरभिधा-तात्पर्य-लक्षणाख्यानाम् ।
अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम् ॥

'नानुमानं रसादीनां व्यंग्यानां बोधने क्षमम् ।
आभासत्वेन हेतूनां स्मृति र्नच रसादिधीः' ॥

२—माधुर्यं गुणस्य लक्षणमुदाहरणञ्च समुपन्यस्य तद् व्यञ्जकान् वर्णानुपवर्णयन्तु १०

अथवा

प्राचीनाभिमतान् दश शब्दगुणान् नामतो निर्दिश्य दर्पणकारदिशा निरस्यन्तु ।

३—कति रीतयः, कानि च तन्नामानीति समावाय तासाम् एकमेकम् उदाहरणं प्रदर्शयन्तु । १०

४—अलङ्कारं लक्षयित्वा सर्वत्र शब्दार्थयोः सद्भावे समानेऽपि शब्दार्थालङ्कारयोर्मिथोभेदे युक्तिं प्रकटयन्तु । १०

५—उपमोत्प्रेक्षा-विरोधाभास-परिसंख्यानाम् रूपकोल्लेख-समासोक्ति-तद्‌गुणानां वालङ्काराणां लक्षणोदाहरणानि प्रतिपादयन्तु । १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः ५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—पराशरेण शुभपापव्यवस्था कीदृशी कृता । ७

२—लग्नाद् व्ययद्वितीयेशौ परेषामित्यादि पद्यं स्फुटं व्याख्येयम् । ८

अथवा

केन्द्रत्रिकोणपतयः कदा विशेषफलदायका भवन्ति ।

३—पुत्रसुखाभावयोगो लेख्यः । ८

४—दुरुधरायोगलक्षणं तत्फलं च लिख । ७

५—प्रश्नलग्नाद् विवाहज्ञानं कथं भवेत् । ७

अथवा

प्रोक्ते दुष्टभकूटके परिणय इत्यादि पद्यं सम्यग् व्याख्येयम् ।

६—वधूप्रवेशद्विरागमयोर्मध्ये कस्याप्येकस्य मुहूर्तं लिख । ६

७—योगः, अधियोगः, योगाधियोगः एषां लक्षणं फलं च लिख । ७

अथवा

ग्रहस्यायादिनवानां ज्ञानं कथम् ।

—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षः २०२३ (१९६७)

समय:- घण्टात्रयम्]

[पूर्णाङ्काः—५०

[क] सवै प्रश्नहरूका अंक समान छन् ।

[ख] कुनै पाँच प्रश्नहरूको उत्तर दिनुहोस् ।

१—मूल्य-विभेद के हो ? यो कुन परिस्थितिमा अनिवार्य छ ? यसको सफलताको निमित्त आवश्यक परिस्थितिहरूको वर्णन गर्नुहोस् ।

२—अल्पावधि तथा दीर्घावधि तत्वहरूको मूल्य निर्धारणमा के महत्व छ ?

३—लगानको आधुनिक सिद्धान्तको वर्णन गर्नुहोस् । यो सिद्धान्त कसरी सवै उत्पादन-साधनहरूको आयमा लागु भएको छ देखाउनोस् ।

४—मजदूरी-कोष-सिद्धान्तको पूर्ण व्याख्या गरेर यो नै सर्वोत्तम सिद्धान्त हो होइन वताउनोस् ।

५—"मनुष्यको जीवनमा द्रव्यको महत्व रहेकोछ, छ र रहला, यो मनुष्यको निमित्त एक अनिवार्य आवश्यक अभिशाप हो" यस कथनको समीक्षा गर्नुहोस् ।

६—"वैंक सारा अर्थ व्यवस्थाको ढाड हो, यसकारण यसको राष्ट्रीयकरण आवश्यक छ" यो भनाईको समीक्षा गर्नुहोस् ।

७--सार्वजनिक व्ययको वृद्धिको कारणहरू वताउनोस् ।

८--"सामाजिक कल्याणको सिद्धान्तनै सार्वजनिक अर्थ नीति को मूल हो" यस उक्तिको विवेचना गर्नुहोस् ।

९—तुलनात्मक-लागत-सिद्धान्तको व्याख्या गर्नुहोस् । अन्तर्राष्ट्रीय व्यापारको के यही नै सर्वोत्तम सिद्धान्त हो ?

१०--कुनै दुइको टिप्पणी लेख्नुहोस् :--

(क) व्यापार चक्र (ख) संरक्षण व्यापार नीति

(ग) एकाधिकार (घ) परोक्ष कर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्षः२०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

[ख] कुनै पाँच प्रश्न को उत्तर लेख्नु होस ।

१—अध्यक्षात्मक र संसदीय शासनको अन्तरको सविस्तार व्याख्या गर्नुहोस ।

२—'आफ्नो आदर्शको पूर्णतः अनुसरण र एमा राजतंत्रात्मक शासन सबै शासन मध्ये उत्तम हो'—व्याख्या गर्नु होस ।

३—लिखित-अलिखित संविधानमा के अन्तर छ र भारतवर्ष र इगलैंडको शासन व्यवस्थाको आधार लिई व्याख्या गर्नु होस ।

४—विधेयक भनेको के हो ? इगलैंडमा विधेयक कसरी पारित हुन्छ ?

५—नेपालको संविधानमा राजाको स्थानको व्याख्या गर्नु होस ।

६—भारतवर्षको संघीय लोकसेवा आयोगको गठन र कार्यको वर्णन गर्नुहोस ।

७—भारतवर्षको राष्ट्रपतिको अधिकार र कार्यको वर्णण गर्नुहोस ।

८—नेपालको संविधान (२०१९) को विशेषता हरूको वर्णण गर्नु होस ।

९—नेपालको न्यायिक व्यवस्थाका प्रमुख विशेषता हरूको व्याख्या गर्नु होस ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्री २
अ. १५त्र

त्र (४३)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [सम्पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम्।

१—वायोर्नवैकादश तेजसो गुणाः जलक्षितिप्राणभृतां चतुर्दश। ६
दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव च॥
इति श्लोकोक्तक्रमेण वाय्वादीनां गुणान् नाम्ना निर्दिश्य, पदार्थानां द्वैविध्यं जगदीशोक्तदिशोपपादयत।

अथवा

ईश्वरे चानुमानप्रमाणमित्युक्तं ग्रन्थकृता, तदाकारः कः? तेन कथमीश्वरसिद्धिः? संयोगः कतिविधः? अयथार्थज्ञानस्य चातुर्विध्यं कथम्? लौकिकालौकिकसन्निकर्षयोः स्वरूपं च प्रदर्शयत।

२—केवलान्वयि-केवलव्यतिरेक्यन्वयव्यतिरेकिणां स्वरूपोदाहरणे प्रदर्श्य, सव्यभिचारभेदान् सोदाहरणं निरूपयत। ६

३—पदानां चातुर्विध्यम्, प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधप्रकारम्, च परिष्कुरुत। ६

४—अनुबन्धचतुष्टयमुपन्यस्य, अज्ञानस्यानिर्वचनीयत्वम्, उपासनावाक्यानां च प्रयोजनं प्रदर्शयत। ६

५—जीवन्मुक्तिस्वरूपं तस्य क्रममुक्तिप्रकारं चोपवर्ण्य, तत्त्वमसीत्यादौ अखण्डार्थबोध इत्युक्तं सारकृता, कोऽयमखण्डार्थो नाम? तत्प्रतिपादकत्वं कथं तत्त्वमसीतिवाक्यस्य तत्सर्वं ग्रन्थोक्तदिशोपपादयत। ६

६—किं नाम दुःखत्रयम्? तदात्यन्तिकीनिवृत्तिश्च कथम्? सांख्यमते त्रिविधं प्रमाणमित्युक्तं ग्रन्थकृता किं तत्। ६

७—भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च।
कारणकार्यविभागादविभागाद् वैश्वरूप्यस्य॥१५॥
प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि॥
इति श्लोकद्वयं व्याख्यात। ६

अथवा

अपर पृष्ठे द्रष्टव्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधोनिर्दिष्टकारिकाणां व्याख्यां कुरुत—

तन्मात्राण्यविशेषाः तेभ्यो भूतानि पञ्च पञ्चभ्यः ।
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ॥३८॥
वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥५७॥
रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥५९॥

८—अधोनिर्दिष्टानां सूत्राणामर्थं विशदयत— ८

(१) वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः

(२) अनुभूतविषया सम्प्रमोषः स्मृतिः

(३) ऋतम्भरातत्र प्रज्ञा

(४) देशवन्धश्चित्तस्य धारणा ।

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्री २
अ. २ पत्र

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—अधोनिर्दिष्टेषु कविपण्डितेषु केषांचित् त्रयाणामैतिहासिकविवरणं संक्षेपेण विलेखनीयम् । १०

(क) मातृचेटः, (ख) भवभूतिः, (ग) बाणभट्टः, (घ) माघः, (ङ) भास्कराचार्यः, (च) कपिलाचार्यः, (छ) रत्नाकरः, (ज) मम्मटः (झ) भट्टोजी दीक्षितः, (ञ) विज्ञानभिक्षुः ।

२—किं नाम महाकाव्यम् ? संस्कृतसाहित्ये महाकाव्यस्य आविर्भावः कथं कदा च संजातः ? सर्वं विविच्य लिखत । १०

अथवा

महाकवि–कालिदासविषये किमिव संविज्ञातं भवता तस्य समयग्रन्थादिसमीक्षापूर्वकं तत्सर्वं लिखत ।

३—अधोलिखितेषु मन्त्रेषु केषांचित् त्रयाणां व्याख्या सुष्ठु कार्या । १५

(क) पृषदश्वामरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ॥

(ख) येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥

(ग) यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥

(घ) समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥

४—अधोलिखेतेषु श्लोकेषु द्वयोर्व्याख्या कार्या । १५

(क) कृताग्निहोत्रो भुञ्जीत वाग्यतो गुर्वनुज्ञया ।
आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् ॥

(ख) त्रैवार्षिकाधिकान्नो य स हि सोमं पिबेद् द्विजः ।
प्राक् सौमिकीः क्रियाः कुर्याद् यस्यान्नं वार्षिकं भवेत् ।

(ग) अग्र्याः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मविद् युवा ।
वेदार्थविद्ज्येष्ठ सामा त्रिमधुस्त्रिसुपर्णिकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समय

१—

२-

३—

४—

५—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्री २
अ. ३ पत्र

त्र (४५)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम् ।

१—अधोलिखितेषु अन्यतमं विषयमवलम्ब्य सरलया सरसया सुरभारत्या मनोहरो गद्यमयस्त्रिभ्योऽन्यूनेषु पृष्ठेषु निबन्धो लेख्यः । ३०

(क) विद्ययामृतमश्नुते । (ख) दर्शनानां विकासक्रमः ।

(ग) परोपकाराय सतां विभूतयः । (घ) नेपालराष्ट्रम् ।

(ङ) रामनवमी ।

२--अधोलिखितवाक्येषु अशुद्धयः कारणनिर्देशपूर्वकं शोधनीयाः । ८

(क) ते पूज्याः गुरवो सन्ति ।

(ख) ततो सहैव रामेण अनुगङ्गाम्मुनिः गतः ।

(ग) सोऽध्ययनाय भारतं प्रतिष्ठति ।

(घ) राजा रक्षायै अन्यदेशेभ्यो आयुधं परिक्रीणाति ।

(ङ) सूर्यः पावनैः करजालैः पद्मं बोधयते ।

(च) स वाराणस्यामधिवसति ।

(छ) पाणिपादौ प्रतप्य रथिकाश्वारोहौ पश्य ।

(ज) अधर्ममाचरसि चेत् ईश्वरसभायां किं वक्ष्यसि ।

३--राजन् ! दुधुक्षसि यदि क्षितिधेनुमेतां,
तेनाद्य वत्समिव लोकममुं पुषाण ।
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे,
नानाफलैः फलति कल्पलतेव भूमिः ॥

अस्य पद्यस्याभिप्रायो वर्ण्यताम् । ६

४—दुधुक्षसि, क्षितिः, पुराण एषु प्रकृतिप्रत्ययौ निर्देश्यौ । ३

५—सेनापति-विनता-अञ्जनाशब्देभ्यः तद्धितप्रत्यये एकैकं रूपं लिखत । ३

——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्री २
अनिवार्य ४ पत्र

त्र (४६)

वर्षः २०२३ (१९६७)

समयः—घण्टात्रयम्] [पूर्णाङ्काः—५०

[क] परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शव्दैर्लेखनीयम् ।
[ख] प्रतिप्रश्नं लभ्याङ्काः दक्षिणतः निर्दिष्टाः ।

१—कुनै एक खण्डको सरल शुद्ध नेपालीभाषामा अनुवाद गर्नुहोस् । १०

(क) क्रमेण च तं समासादितविग्रहम् अनङ्गम् इव अवतीर्णं नगरमार्गम् अनुप्राप्तम् अवलोक्य सर्व एव परित्यक्तसकलव्यापारः रजनीकरोदयपरिबुध्यमानकुमुदवनानुकारीजनः समजनि । 'सति अस्मिन् मुखकुमुदकदम्बकविक्रृताकृतिः कार्तिकेयः विडम्बयति कुमारशब्दम् । अहो वयम् अतिपुण्यभाजः यद् अमानुषीम् अस्य आकृतिम् अन्तः समारूढप्रीतिरसनिष्यन्दविस्तारितेन कुतूहलोत्तानितेन लोचनयुगलेन अनिवारिताः पश्यामः । सफला नः अद्य जाता जन्मवत्ता । सर्वथा नमः अस्मै रूपान्तरधारिणे भगवते चन्द्रापीड़च्छद्मने पुण्डरीकेक्षणाय' इति वदन् आरचितप्रणामाञ्जलिः नगरलोकः प्रणनाम ।

(ख) अथ अवतीर्य तुरगात् प्रविश्य भक्तिप्रवणेन चेतसा तां प्रणनाम । कृतप्रदक्षिणश्च पुनः प्रणम्य प्रशान्तोद्देशदर्शनकुतूहलेन परिभ्रमन् उच्चैः आरटन्तम् आक्रोशन्तं च कुपितं द्रविडधार्मिकम् एक देशे ददर्श । दृष्ट्वा च कादम्बरीविरहोत्कंठोद्वेगदूयमानः अपि सुचिरं जहास । न्यवारयत् च तेन सार्धं प्रारब्धकलहान् अपहसतः स्वसैनिकान् । उपसान्त्वनैः च कथम् अपि प्रियालापशतानुनयैः प्रशमम् उपनीय क्रमेण जन्मभूमिं, जातिं विद्यां च कलत्रम्, अपत्यानि विभवं, वयः प्रमाणं, प्रव्रज्यायाः च कारणं पप्रच्छ । पृष्टः च असौ अवर्णयद् आत्मानम् । अतीतस्वशौर्यरूपविभववर्णनवाचालेन तेन सुतराम् अरज्यत राजपुत्रः । विरहातुरहृदयस्य विनोदताम् इव आगात् ।

२—एकलव्यको कथाको उल्लेख गरी एकलव्यका वैशिष्टयको विवेचन गर्नुहोस् । १०

अपर पृष्ठं द्रष्टव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा

कौरवसभासमक्ष द्रौपदीको के उजुर थियो ? समाधान कसले के कस्तो गयो ? लेख्नुहोस् ।

अथवा

युधिष्ठिर यक्षसंवादको प्रसंग देखाई त्यसको परिणामको विशद उल्लेख गर्नुहोस् ।

३—कुनै एक चाड़को परिचय दिनुहोस् :— ५

(क) गाईयात्रा, (ख) इन्द्र यात्रा, (ग) श्रीपञ्चमी ।

४—कुनै एक विषय लाइ लिएर निबन्ध लेख्नु होस् :— २०

(१) त्रिभुवन राजपथ, (२) प्राचीन हिन्दू संस्कार,

(३) महाकवि देवकोटा, (४) जीवनमा हास्य व्यङ्गको स्थान,

५—सारांश लेख्नुहस् । ५

म नेपालमा हुँदा वनकालीमा आनन्द पाउन सक्त छ तर कलकत्ता जांदा विर्सन्छ । पहाड र गानाको नित्य संबन्ध छ जस्तो वाफ् र अर्थको । स्वर्ग वर्षन्छ त्यही; पहाडी अविरल झरझरको संगीत द्वारा भावनादोष सुधार हुन सक्तछ किनकि संघर्षणविकृतमानवहृदय हरूका प्राथमिक सुर मिलाउने प्रभावहरू त्यहाँ पाइन्छन् । यी पातहरू सब हरिया भाव बन्दैछन्, यीसरसर हृदयमा दगुर्दैछन् ।

— —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०२३ सालको
उत्तरमध्यमा र शास्त्रीको
प्रश्न पत्रहरू। वाल्मीकि संस्कृत
महाविद्यालय – रामशाहपथ (पुतलीसडक)
काठमाडौं नेपाल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१५ ग्या

ग्या (८५-३०):

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Sanskrit College

Sangkrit College

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सं. पु. नि.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu